Gangesa
Tattvacintamani-didhiti-
vivrti

B
132
N8G3
1910
v.1
pt.5

V. 1
Part. 5

BIBLIOTHECA INDICA:
A
COLLECTION OF ORIENTAL WORKS
PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No. 1314.

तत्त्वचिन्तामणि-दीधिति-विवृति

UNIVERSITY OF TORONTO
LIBRARY
APR 16 1969

B
132
N8G3
1910
V.1
PT.5

TATTVACINTĀMANI DIDHITI-VIVRITI

BY

GADADHARA BHATTACHARYYA

WITH TATTVACINTAMANI AND DIDHITI

EDITED BY
MAHĀMAHOPĀDHYĀYA KAMAKHYANATHA TARKAVAGISA,
Late Professor, Sanskrit College.

VOLUME I. FASCICULUS V.

Calcutta.
PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,
5, Nandakumar Chawdhury's 2nd Lane.
AND PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.
1911.

पो० बाक्स नं० ८, बनारस-१

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH,
11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR. OTTO
HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

*Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each	Rs.	1	4
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each		1	14
*Agni Purāṇa, Fasc. 6-14 @ /10/ each		5	10
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each		14	6
Aitereya Lochana.		2	0
*Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each		2	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/-		1	0
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each		3	12
*Atharvana Upanishad, Fasc 4-5 @ /10/ each		1	4
Atmatattaviveka, Fasc. I. @ /10/ each		0	10
Açvavaidyaka, Fasc. 1-5 @ /10/ each		3	2
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-7; Vol. II. Fasc. 1-7 @ 1/ each		15	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol 2, Fasc. 1 @ /10/ each		1	14
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fasc 1-3 @ /10/ each ...		3	12
*Bhāmatī, Fasc. 4-8 @ /10/ each		3	2
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-6; Vol. 2, Fasc. 1, @ /10 each ...		4	6
Baudhyostatrasangraha		2	0
Bṛhaddēvatā Fasc. 1-4 @ /10/ each		2	8
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each		3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each		3	2
Cri Cantinatha Charita, Fasc. 1-3		1	14
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each		1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each		8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-5, Vol. III, Fasc. 1-7 Vol. 5, Fasc. 1-4 @ /10/ each		14	6
Ditto Vol. 6, Fasc. 1-3 @ 1/4/ each		3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/		3	2
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1-14 @ /10/ each		8	12
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10. Vol. IV. Fasc. 1-6 @ /10/ each ...		36	14
Ditto Vol. 4. Fasc. 7-8. @ 1/4/ each		2	8
Ditto Vol. IV, Fasc. 8-9 @ /10/		1	4
Çlockavartika, (English) Fasc. 1-7 @ 1/4/ each		8	12
*Çrauta Sūtra of Āpastamba, Fasc. 12-17 @ /10/ each		3	12
Ditto Çāṅkhāyana, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4; Vol 4. Fasc. 1 @ /10/ each		10	0
Çrī Bhāshyam, Fasc 1-3 @ /10/ each		1	14
Dāna Kriyā kaumudī, Fasc 1-2 @ /10/ each		1	4
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each		4	6
Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each		3	2
Gobhiliya Grihya Sutra, Vol. I. @ /10/ each		3	2
Ditto Vol. II. Fasc. -2 @ 1/4/ each		2	8
Ditto (Appendix) Gobhila Parisista		2	0
Ditto Grihya Sangraha		0	10
Haralata		1	14
Karmapradiph, Fasc. I		1	4
Kāla Viveka, Fasc. 1-7 @ /10/ each		4	6
Kātantra, Fasc. 1-6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each		17	8
*Kūrma Purāṇa, Fasc. 3-9 @ /10/ each		4	6
Lalita-Vistara, (English) Fasc. 1-3 @ 1/- each		3	0
Madana Pārijāta, Fasc. 1-11 @ /10/ each		6	14
Mahā-bhāṣya-pradipōdyōta, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-12 Vol. III, Fasc. 1-10 @ /10/ each		19	6
Ditto Vol. IV, fasc. 1 @ 1/4		1	4
Manutīkā Sangraha, Fasc. 1-3 @ /10/ each		1	14
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-9 @ 1/- each		9	0

योगितानवच्छेदकतत्कत्वरूपतदनतिरिक्तवृत्तित्वस्यैव विवक्षणीयतया तद्घटकाभावे (१) व्याप्यवृत्तित्वनिवेशे प्रयोजनविरहेण संयोगादिसाध्यकसद्धेतौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकसंयोगत्वादेर्निरुक्तानतिरिक्तवृत्तित्वस्य संयोगत्वादिसाधारण्यविरहेणाव्याप्त्यनवकाशेन हेतुसमानाधिकरणाभावे व्याप्यवृत्तित्वविशेषणवैयर्थ्यात्। न च स्वविशिष्टसम्बन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणादाने संयोगेन द्रव्यस्याव्याप्यवृत्तितापत्तेः संयोगेन साध्यतायां हेतुसमानाधिकरणसाध्यतावच्छेदकसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकं यद्विशिष्टसम्बन्धिनिष्ठाभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकं तादृशधर्म्माप्रसिद्धेः तादृशाभावप्रतियोगितावच्छेदकीभूतसकलधर्म्मावच्छिन्नानामेव संयोगेनाभावानां केवलान्वयित्वादिति स्वविशिष्टसम्बन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणस्यावश्यकतेति वाच्यम्। संयोगाद्यभावव्यावर्त्तकस्यावच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वस्य निवेशे संयोगेन साध्यतायां हेतुसमानाधिकरणसाध्यतावच्छेदकसम्बन्धावच्छिन्नाभावो गुणादीनामेव व्याप्यवृत्तिर्न तु द्रव्यस्येति तादृशाभावप्रतियोगितावच्छेदकं यद्विशिष्टसम्बन्धिनिष्ठतादृशाभावप्रतियोगितानवच्छेदकं तादृशधर्म्माप्रसिद्धितादवस्थ्यात् प्रतियोगितायाः साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं परित्यज्य एकसम्बन्धावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य वा विशेषणत्वपक्षस्यैवावलम्बनीयतया व्याप्यवृत्तित्वविशेषणवैयर्थ्यस्य दुरुद्धरत्वात् तस्मात्

(१) तादृशपारिभाषिकावच्छेदकत्वघटकाभावे इत्यर्थः।

'वक्ष्यमाणं वेत्यादिग्रन्थस्य (१) अभावे व्याप्यवृत्तित्वविशेषणं न देयमेव तददानेऽपि संयोगत्वादौ द्रव्यत्वसमानाधिकरणाभावप्रतियोगित्वीयपारिभाषिकावच्छेदकत्वविरहेणाव्याप्त्यप्रसक्तेरित्याशयः। ननु पारिभाषिकावच्छेदकत्वशरीरनिविष्टस्वविशिष्टसम्बन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणमावश्यकम् अन्यथा तुल्ययुक्त्या सत्तादिहेतुकेऽपि संयोगत्वादौ पारिभाषिकावच्छेदकत्वानिर्व्वाहादिति हेतुमन्निष्ठाभावेऽपि तद्विशेषणमावश्यकम् अन्यथाव्याप्तेरित्याशङ्कां सत्तादिहेतुकस्थले गुणत्वाद्यवच्छिन्नाभावप्रतियोगितायाः पारिभाषिकावच्छेदकत्वं संयोगत्वादौ प्रदर्श्य वारयति, 'भवति चेति, गुणत्वाद्यवच्छिन्नाभावानां व्याप्यवृत्तित्वाभिधानञ्च संयोगत्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वसूचनाय, जन्यद्रव्येषूत्पत्तिकालावच्छेदेन गुणत्वाद्यवच्छिन्नाभावस्य नवीनैरुपगमात्तन्मते गुणत्वस्य संयोगत्वविशिष्टसम्बन्धिनिष्ठाभावीयप्रतियोगितानवच्छेदकत्वं न सम्भवतीति 'गुणावृत्तित्वानुसरणं, संयोगि गुणान्यत्वे सति सत्त्वादित्यादौ गुणावृत्तित्वं न विशिष्टहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकमतः संयोगसाध्यकव्यभिचारिमात्रे यादृशप्रतियोगितावच्छेदकमुपादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वं निर्व्वहति तादृशधर्म्ममाह, 'द्रव्यमात्रसमवेतत्वेति।

इति चक्रवर्त्तिलक्षणव्याख्या।

---

(१) ग्रन्थस्येत्यनेन आशय इत्यस्य सम्बन्धः।

प्रगल्भलक्षणद्वयम् ।

तत्त्वचिन्तामणि-दीधितिः ।

साध्यतावच्छेदकविशिष्ट(१)साध्यसामानाधिकरण्या-वच्छेदकस्वसमानाधिकरणसाध्याभावत्वकत्वं, यत्समानाधिकरणसाध्याभावप्रमायां साध्यवत्ताज्ञानप्रतिबन्धकत्वं नास्ति तत्त्वं वा व्याप्तिरिति तु न युक्तं सर्व्वत्र साध्याभावपदवैयर्थ्यात् ।

गादाधरी विवृतिः ।

प्रगल्भलक्षणद्वयमेकदोषेण दूषयितुमुपन्यस्यति, 'साध्यतावच्छेदकविशिष्टेत्यादि, विशिष्टाभावो विशेष्य-विशेषणसम्बन्धाभावरूपः, उभयाभावश्च परम्परासम्बन्धेन द्वित्वाभावरूप इति मतेनेदं लक्षणमन्यथा व्यधिकरणधर्म्मावच्छिन्नाभावं विनापि तादृशाभावमादाय लक्षणसमन्वयसम्भवे 'प्रतियोग्यवृत्तिश्चेति ग्रन्थानुत्थितेरिति ध्येयम् । अवच्छेदकत्वमिहानतिरिक्तवृत्तित्वं न तु स्वरूपसम्बन्धविशेषः यथोक्तधर्म्मयोस्तादृशावच्छेद्यावच्छेदकभावे मानाभावात् । 'स्वपदं हेतुतावच्छेदकावच्छिन्नहेतुपरं, तथाच साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यानतिरिक्तवृत्ति यद्धर्म्मविशिष्टसमानाधिकरणसाध्याभावत्वं तद्धर्म्मवत्त्वं व्याप्तिरिति तु समुदितार्थः, सद्धेतौ साध्यासमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य हेत्वसमानाधिकरणत्वनियमात् तादृशसाध्याभावत्वं साध्यसामा-

---

(१) साध्यतावच्छेदकावच्छिन्नेति पा० ।

नाधिकरण्यानतिरिक्तवृत्तीति लक्षणसमन्वयः। व्यभिचारिणि तादृशसाध्याभावस्यापि हेतुसमानाधिकरणतया तदतिरिक्त-वृत्त्येव तदिति न लक्षणसमन्वयः। गुण-कर्म्मान्यत्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तेर्व्वारणाय 'साध्यतावच्छेदकविशिष्टेति, साध्याधिकरणत्वं साध्यतावच्छेदकसम्बन्धेन बोध्यं तेन संयोगादिना धूमादेरभावस्य कालिकादिना धूमादिमति वृत्तावपि (१) नातिव्याप्तिः। द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तेर्व्वारणाय हेतुतावच्छेदकविशिष्टत्वेनोपादानं, तद्विशिष्टाधिकरणत्वं हेतुतावच्छेदकसम्बन्धेन बोध्यं तेन धूमादिसमवायिनिष्ठवह्नित्वाद्यवच्छिन्नवह्न्याद्यभावस्य वह्न्यादिसामानाधिकरण्यविरहेऽपि न क्षतिः। साध्य-हेतुसामानाधिकरण्यघटकवृत्तिद्वयमेकसम्बन्धेन बोध्यं तेन द्रव्यं सत्त्वादित्यादौ दैशिकविशेषणतया हेतुसमानाधिकरणस्य द्रव्यत्वत्वाद्यवच्छिन्नद्रव्यत्वाद्यभावस्य कालिकादिसम्बन्धेन साध्यवन्महाकालादिवृत्तित्वेऽपि न क्षतिः। यद्यपि हेतुसमानाधिकरणसाध्याभावत्वघटकमभावत्वरूपं विशेष्यं व्यतिरेकिसाध्यके साध्यासमानाधिकरणाभावसाधारणमिति विशिष्टसाध्यसामानाधिकरण्यशून्यावृत्तित्वरूपन्तदनतिरिक्तवृत्तित्वं दुर्व्वचं, तथापि यावन्तः स्वसमानाधिकरणसाध्याभावा विशिष्टसाध्यसमानाधिकरणाः इत्यर्थस्य विवक्षणीयतया न दोषः। अव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिव्याप्तिः साध्याभावस्य साध्यवत्यपि वृत्तेरिति तु नाशङ्कनीयं व्यभिचारनिरूपकाधिकरणं यत् तदवृत्तित्वावच्छिन्ना-

(१) समवायादिना धूमादिमति वृत्तावपीति पा०।

भावस्यापि साध्याभावतया तस्य च साध्यवत्यवृत्तेः(१)। 'यत्समानाधिकरणेति यद्रूपविशिष्टसमानाधिकरणेत्यर्थः, तेन द्रव्यं गुणकर्म्मान्यत्वे सति सत्त्वादित्यादौ सत्तासमानाधिकरणद्रव्यत्वत्वावच्छिन्नद्रव्यत्वाभावप्रमायां साध्यवत्त्वज्ञानप्रतिबन्धकत्वेऽपि न क्षतिः। यद्धर्म्मावच्छिन्नसामानाधिकरण्यशरीरे च हेतुतावच्छेदकसम्बन्धेन यद्धर्म्मावच्छिन्नाधिकरणत्वं निवेशनीयं तत्प्रयोजनन्तु स्फुटमेव (२)। अधिकरणवृत्तित्वञ्च निरवच्छिन्नं ग्राह्यं, तेन कपिसंयोगी एतद्वृक्षत्वादित्यादौ हेतुसमानाधिकरणकपिसंयोगत्वावच्छिन्नकपिसंयोगाभावादिविषयकप्रमाया अव्याप्यवृत्तित्वज्ञानविरहकालीनायाः साध्यवत्त्वज्ञानप्रतिबन्धकत्वेऽपि न क्षतिः, 'प्रमायां' प्रमासामान्ये, तेन व्यभिचारिणि नातिव्याप्तिः, समानाधिकरणधर्म्मावच्छिन्नाभावत्वेन व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववत्त्वज्ञानस्य साध्यवत्त्वज्ञानविरोधित्वात् सद्धेतावपि लक्षणगमनासम्भव इत्यतो ज्ञानसामान्यमुपेक्ष्य प्रमासामान्यनिवेशनं, प्रमापदञ्च भ्रमसामान्यभिन्नज्ञानपरम् (३) अत उक्तभ्रमात्मकज्ञानस्याभावत्वाद्यंशे प्रमात्वेऽपि न क्षतिः। साध्यवत्ताज्ञानपदमपि तत्सामान्यपरं अतो व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववत्ताज्ञानस्य तद्धर्म्मवत्त्वेन साध्यवत्तावगाहिज्ञानविरोधित्वेऽपि न क्षतिः, एवञ्च साध्यपदं साध्यतावच्छेदकविशिष्टपरं, ज्ञानञ्च स्वसमानधर्म्मितावच्छेदककत्वेन

(१) अव्याप्यवृत्तीत्यादिः अवृत्तेरित्यन्तः पाठः केषुचिदादर्शपुस्तकेषु नास्ति।

(२) वह्निमान् धूमादित्यादावव्याप्तिवारणमेव प्रयोजनम्।

(३) यावद्भ्रमभिन्नपरमिति पा०।

स्वविषयीभूताभावप्रतियोगितावच्छेदकसंसर्गकत्वेन च विशेषणीयं तेन धूमत्वाद्यवच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाद्यभाववत्ताज्ञानस्य साध्यवत्ताज्ञानसामान्यान्तर्गतद्रव्यत्वादिना धूमादिप्रकारकं भिन्नधर्म्मावच्छिन्नविशेष्यकधूमत्वाद्यवच्छिन्नप्रकारकं समवायादिसम्बन्धेन धूमत्वाद्यवच्छिन्नप्रकारकञ्च ज्ञानं प्रत्यप्रतिबन्धकत्वात् कामिनीजिज्ञासादेरेव च तादृशज्ञानसामान्यविरोधित्वात् अतिव्याप्तेर्नावकाशः। 'साध्याभावपदवैयर्थ्यादिति, अत्र च साध्यतावच्छेदकविशिष्टसामानाधिकरण्यावच्छेदकत्वं स्वव्यापकतादृशसामानाधिकरण्यकत्वं तथाच साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यत्वं यत्समानाधिकरणसाध्याभावत्वव्यापकतावच्छेदकं तत्त्वं व्याप्तिरित्येतादृशार्थकत्वे प्रथमलक्षणे न साध्याभावपदवैयर्थ्यं, यत्समानाधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपयत्सामानाधिकरण्यव्यापकतावच्छेदकत्वात् यत्समानाधिकरणसाध्याभावनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपस्य यत्समानाधिकरणसाध्याभावत्वव्यापकतावच्छेदकत्वस्यातिरिक्ततया तद्घटितलक्षणे यत्सामानाधिकरण्यव्यापकतावच्छेदकत्वस्यानिवेशात् तद्घटितलक्षणसम्भवेऽपि प्रकृतलक्षणे वैयर्थ्यानवकाशात्। एवं यत्समानाधिकरणसाध्याभावप्रमात्वव्यापकः साध्यवत्ताज्ञानप्रतिबन्धकत्वाभावस्तत्त्वमित्येतादृशार्थकत्वे द्वितीयलक्षणेऽपि न तद्वैयर्थ्यं, यत्समानाधिकरणप्रमात्वव्यापकताघटकाभावात् यत्समानाधिकरणसाध्याभावप्रमात्वव्यापकतायामभावान्तरस्यैव निवेशादित्यवधेयम्। इति प्रगल्भलक्षणद्वयव्याख्या समाप्ता।

तत्त्वचिन्तामणि-दीधितिः।

यत्तु साध्याभाववति यद्वृत्तौ प्रकृतानुमितिविरोधित्वं नास्ति तत्त्वं व्याप्तिरिति, तन्न, अनुमित्यविरोधित्वज्ञानस्यानुमितिजनकत्वे साध्याभाववद्वृत्तित्वज्ञानस्यानुमित्यविरोधितया व्यभिचारिण्यतिप्रसङ्गात्।

गादाधरी विवृतिः।

'साध्याभाववतीति यन्निष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितासामान्ये प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावस्तत्त्वमित्यर्थः, वह्निमान् धूमादित्यादौ हेतुनिष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपिता विषयिता व्यधिकरण-धर्म्मावच्छिन्नाभाववद्वृत्तित्वत्वविशिष्टविषयितैव सा च न वह्न्यनुमितिप्रतिबन्धकतावच्छेदिका तच्छालिज्ञानस्यानुमित्यप्रतिबन्धकत्वात्, व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वविषयितापि तादृशी तद्वतो ज्ञानस्य च व्यभिचारज्ञानविधयानुमितिप्रतिबन्धकत्वात् तादृशविषयिताया अनुमितिप्रतिबन्धकतावच्छेदकत्वान्नातिव्याप्तिः। यन्निष्ठत्वस्यानुपादाने धूमाद्यंशे वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वावगाहिभ्रमनिष्ठवह्न्यभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयिताया अनुमितिप्रतिबन्धकतावच्छेदकत्वात् वह्निमान् धूमादित्यादावव्याप्तिः (१) अतस्तदुपादानं, तथाच

---

(१) केवलान्वयिनि साध्याभाववद्वृत्तितात्वविशिष्टनिरूपिततादृशभ्रमविषयताया अप्रसिद्धत्वेन व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरू-

भ्रमविषयवह्न्यभाववद्वृत्तित्वस्य हेतुनिष्ठत्वाभावान्नदोषः। यन्निष्ठ-पदार्थनिरूपितविषयितासामान्ये यन्निष्ठसाध्याभाववद्वृत्तित्वविष-यितासामान्ये इति वा यद्युच्यते तदा व्यधिकरणधर्म्मावच्छिन्न-साध्याभाववद्वृत्तित्वमेव यत्र समानाधिकरणधर्म्मावच्छिन्नसाध्या-भाववद्वृत्तितात्वेन भातं तादृशज्ञानीयहेतुनिष्ठतथाविधसाध्या-भाववद्वृत्तित्वनिरूपितविषयिताया अप्यनुमितिप्रतिबन्धकतावच्छे-दकत्वादसम्भवोऽव्याप्तिर्व्वेति (१) साध्याभाववद्वृत्तित्वत्वविशिष्ट-निरूपितत्वं विषयितायाविशेषणं तादृशभ्रमविषयिता च न साध्या-भाववद्वृत्तित्वत्वविशिष्टनिरूपिता तादृशविषयितानिरूपकस्य व्यधि-करणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य विशेषणीभूतं यत्समाना-धिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वं तद्विशिष्टत्वाभावात्। न च तद्विशिष्टनिरूपितत्वं यदि तदवच्छिन्ननिरूपकताकत्वं तदा समानाधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तितात्वस्य तद्भ्रम-विषयवृत्तावसत्त्वेऽपि तन्निष्ठविषयितानिरूपकत्वे व्यधिकरणी-भूयावच्छेदकत्वाद्भ्रमविषयितायास्तद्विशिष्टनिरूपितत्वमक्षतमेव। यदि च वस्तुगत्या यत्र तद्वैशिष्ट्यं तन्निरूपितत्वमेव तद्विशिष्टनिरू-पितत्वं तदा व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वविशिष्ट-निरूपितत्वमेवोक्तभ्रमविषयिताया अक्षतमिति कथं तद्व्यावर्त्तन-मिति वाच्यम्। विशेषणीभूतधर्म्मान्तरविशिष्टेन व्यावर्त्यमानस्य

पितविषयितायाश्च प्रतिबन्धकतावच्छेदकत्वाभाववत्त्वात् लक्षणगमनान्नासम्भवो-ऽभिहितः।

(१) सर्व्वत्र तादृशभ्रमे मानाभावादाह, अव्याप्तिर्व्वेतीति।

विशेष्यस्य भाने विशेषणांशे प्रकारीभवन्त्यां (१) व्यक्तौ विशेष्य-सम्बन्धितावच्छेदकतया विशिष्टवैशिष्ट्यबोधे भानात् साध्याभाववद्वृत्तित्वत्वरूपविशेषणविशिष्टविषयेण निरूपकीभूय विषयिताव्यावर्त्तने व्यावर्त्तकविषयस्याश्रयतया व्यावर्त्तकं यत् साध्याभाववद्वृत्तितात्वं तस्यापि निरूपकतावच्छेदकीभूय विषयिताव्यावर्त्तकत्वादुक्तभ्रमविषयिताव्यावृत्तेः (२) तद्व्यावर्त्तकविषयव्यावर्त्तकस्य तन्निष्ठसाध्याभाववद्वृत्तितात्वस्य तादृशविषयितानिरूपकतानवच्छेदकत्वात् इति तादृशविषयितायाः लक्षणाघटकत्वादेव च भ्रमविषयिताव्यावर्त्तकतयैव साध्याभाववत्पदसार्थक्यं, तादृशविषयितायाउक्तक्रमेण हेतुनिष्ठसाध्याभाववद्वृत्तितात्वविशिष्टानिरूपितत्वेऽपि हेतुनिष्ठाधेयतात्वविशिष्टनिरूपितत्वानपायात् साध्याभावमनुपादायाभावाधिकरणवृत्तित्वत्वविशिष्टविषयितानिवेशे वृत्तौ समानाधिकरणधर्म्मावच्छिन्नाधिकरणीयत्वभ्रमविषयितावारणेऽपि वृत्तिविशेषणे तन्निरूपकेऽधिकरणे यत्र समानाधिकरणधर्म्मावच्छिन्नाभावभ्रमस्तद्विषयितावारणासम्भवेन साध्याभावांशनिवेशस्यावश्यकत्वात् । न च साध्याभावपर्य्यन्तनिवेशेऽपि (३) वह्नित्वावच्छिन्नवह्न्यभावत्वेन व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकवह्न्यभावमवगाह्य तादृशाभाववद्वृत्तित्वावगाहि यज्ज्ञानं तदीयतादृशाभाववद्वृत्तित्वविषयितापि साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितैव

(१) आश्रयतयेत्यादिः ।

(२) तथाच उक्तव्युत्पत्त्या साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितापदेन तदवच्छिन्नतदाश्रयनिष्ठनिरूपकताकविषयितालाभात् न तादृशविषयितायालक्षणघटकत्वमिति भावः । (३) तावत्पर्य्यन्तनिवेशेऽपीति पा० ।

व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताको यः साध्याभावस्तद्वृत्तित्व-त्वस्यैव तत्र विशेषणतया भानात्तद्विशिष्टत्वस्य च तादृशज्ञान-निष्ठविषयितानिरूपकसाध्याभाववद्वृत्तित्वे सत्त्वादिति तद्दोषता-दवस्थ्यमिति वाच्यम्। अभावांशे साध्यतावच्छेदकावच्छिन्नप्रति-योगिताकत्वसम्बन्धेन साध्यप्रकारकं व्यभिचारज्ञानमेवानुमिति-विरोधि, यत्र च व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यं प्रकार-स्तादृशज्ञानविषयघटकस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगि-ताकत्वसम्बन्धेन साध्यविशिष्टस्य व्यधिकरणधर्म्मावच्छिन्नाभाव-स्याप्रसिद्धेस्तादृशज्ञानविषयितायाः विशिष्टनिरूपितत्वासम्भवात्। न चैवमपि समानाधिकरणधर्म्मावच्छिन्नसाध्याभाव-व्यधिक-रणधर्म्मावच्छिन्नसाध्याभावद्वयविशेषिताधिकरणवृत्तित्वावगाहिनः समानाधिकरणधर्म्मावच्छिन्नाभावांशे भ्रमरूपज्ञानस्य विषयि-तायाः व्यधिकरणधर्म्मावच्छिन्नाभाववद्वृत्तितात्वविशिष्टनिरूपित-त्वात् समानाधिकरणधर्म्मावच्छिन्नसाध्याभावविषयितानिरूपिता-धिकरणविषयितानिरूपिताधेयत्वविषयितात्वेन च प्रतिबन्धक-तावच्छेदकत्वादव्याप्तिरिति वाच्यम्। हेतुसामानाधिकरण्यविशिष्ट-साध्याभावत्वविशिष्टविषयितायां प्रतिबन्धकतावच्छेदकत्वाभावस्य विवक्षितत्वात् उक्तभ्रमे च समानाधिकरणधर्म्मावच्छिन्नाभाव-विषयितायास्तादृशविशिष्टनिरूपितत्वाभावेन तस्या एव च प्रति-बन्धकतावच्छेदकत्वेनाव्याप्त्यनवकाशात्। अथ यत्र ज्ञाने हेतुसमा-नाधिकरणतया भासमाने व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताक-

स्व-साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वोभयसम्बन्धेन साध्यस्यैका प्रकारता तादृशज्ञानीयव्यधिकरणधर्म्मावच्छिन्नाभावविषयितायां साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टाभावनिरूपितत्वस्य विषयीभवदभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वासम्भवेऽपि व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टाभावनिरूपितत्वस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धविषयितानिरूपकविषयिताव्वेनानुमितिप्रतिबन्धकतावच्छेदकत्वस्य चाक्षतत्वादव्याप्तिर्दुर्वारैव इति चेन्न, तादृशभ्रमस्याप्रामाणिकत्वात् प्रामाणिकत्वे च संसर्गीयविषयिताद्वयानिरूपकत्वेनाभावविषयिताया विशेषणीयतया सामञ्जस्यात्। अथ साध्यरूपविशेषणविशिष्टस्याभावस्य विषयितानिरूपकतया लक्षणघटकत्वे साध्याभावयोः सम्बन्धस्य सम्बन्धविधया लक्षणघटकत्वमावश्यकं स च सम्बन्धः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वरूपः व्यधिकरणघटत्वावच्छिन्नप्रतियोगिताकत्वरूपश्चाननुगत इति प्रथमस्य निवेशे केवलान्वयिनि साध्यविशेषिताभावस्यैवाप्रसिद्धिः व्यतिरेकिसाध्यकसद्धेतौ च तादृशहेतुसमानाधिकरणाभावाप्रसिद्धिरित्यसम्भवश्चरमस्य निवेशे च सर्व्वत्र व्यभिचारिण्यतिव्याप्तिः प्रतियोगितावच्छेदकधर्म्माणाञ्च उपलक्षणीभूतेन केनचिद्रूपेणानुगमय्य तेन रूपेण तेषां निवेशो न सम्भवति प्रतियोगितावच्छेदकोपलक्षणस्य सम्बन्धघटकतया भानासम्भवात्। न चावच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिताया एव सम्बन्धतया निवेशान्नाननुगमनिबन्धनोक्त दोष इति

वाच्यम् । अवच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिताविषयकाभाव-ज्ञानस्य प्रतियोगिमत्त्वज्ञानाविरोधितया तज्ज्ञानाविरोधिनः प्रति-योगिविशेषिताभावज्ञानस्य चानुभवविरुद्धतया अवच्छेदकावच्छि-न्नत्वाविशेषितप्रतियोगितायाः संसर्गतया अभानात् । न च स्वाव-च्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यतावच्छेदकविशेषित एवा-भावो निवेश्यः, न तु साध्यविशेषितः, वह्नित्वादिना घटाद्यभाव-एव वह्न्यादिसाध्यक-धूमादिहेतुकस्थले लक्षणघटक इति वाच्यम् । प्रमेयत्वाद्यवच्छिन्नसाध्यके तादृशाभावाप्रसिद्धेः एवं स्वावच्छिन्न-प्रतियोगिताकत्वसम्बन्धेन वह्नित्वादिविशेषिते वह्नित्वादिना घटा-देरभावे भासमाने यत्र सम्बन्धघटकप्रतियोगितायां बाधितवह्न्या-दिनिष्ठत्वस्य भानं तादृशज्ञानीयाभावविषयितया उक्तसम्बन्धेन साध्यतावच्छेदकविशिष्टाभावनिरूपिततया अनुमितिविरोधितया चानुपपत्तेर्दुर्व्वारत्वात् स्वावच्छिन्नसाध्यवृत्तित्वविशिष्टप्रतियोगि-तानिवेशे च सर्व्वत्र सद्धेतावप्रसिद्धेः, एवं प्रतियोगिविशेष्यतापन्न-एवाभावे प्रतियोगिपारतन्त्र्येण समानाधिकरणधर्म्मस्य स्वाव-च्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रकारत्वं प्रामाणिकं न तु प्रति-योगिविशेष्यतानापन्ने वह्निर्नास्ति वह्नित्वेन घटो नास्तीत्येव प्रतीतिः न तु वह्नित्वेन नास्तीति तथाच विशिष्य प्रतियोग्यविशे-षितस्य उक्तसम्बन्धेन साध्यतावच्छेदकविशेषितस्याभावस्य विष-यित्वनिरूपकतया निवेशो न सम्भवत्येवेति । मैवं, प्रतियोग्यादि-विशेषिताभावीयत्वेन विशिष्टनिरूपितविषयिता लक्षणे न निवे-श्यते, अपि तु स्वनिरूपकहेतुसमानाधिकरणाभावनिष्ठो यः सम्ब

न्धस्तत्प्रतियोगिसाध्यनिष्ठतत्सम्बन्धावच्छिन्ननिरूपकतावच्छेदकतावच्छेदकतात्वेन, यत्र हेतुसमानाधिकरणघटत्वाद्यवच्छिन्नवह्न्यभावे वह्नित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन वह्न्यादेः साध्यस्य प्रकारता तादृशज्ञानविषयितानिरूपकाभावनिष्ठो न निरुक्ततन्निरूपकतावच्छेदकसम्बन्ध इति तद्विषयिताव्युदासः, यत्र वह्नित्वावच्छिन्नघटाभावे तन्निष्ठवह्नित्वावच्छिन्नप्रतियोगिताकत्वमेव वह्नेः सम्बन्धतया भासते तत्र तत्सम्बन्धप्रतियोगी न वह्निरपि तु घट एवेति साध्ये वास्तवतत्सम्बन्धप्रतियोगित्वनिवेशात्तादृशज्ञानीयाभावविषयिताव्युदासः, साध्यनिवेशाद्यत्र वह्नित्वेन घट एव वह्नित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन तत्सम्बन्धानुयोगिनि वह्नित्वावच्छिन्नघटाभावे प्रकारस्तादृशज्ञानीयाभावविषयितायास्तत्सम्बन्धप्रतियोग्यवच्छिन्ननिरूपकताकत्वेऽप्यनुमितिविरोधित्वेऽपि च न दोषः, यत्र घटत्वावच्छिन्नवह्न्यभावे घटत्वावच्छिन्नप्रतियोगिताकत्वमेव वह्नित्वावच्छिन्नप्रतियोगिताकत्वत्वेन वह्नेः संसर्गतया भासते तादृशज्ञानस्य प्रामाणिकत्वे साध्यप्रतियोगिको हेतुसमानाधिकरणाभावानुयोगिको यद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसम्बन्धस्तद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसम्बन्धावच्छिन्नसाध्यनिष्ठनिरूपकतावच्छेदकत्वं विवक्षणीयमिति(१)। साध्याभाववद्वृत्तित्वरूपविषयस्य प्रतिबन्धकतावच्छेदककोट्यप्रवेशादतिव्याप्तिरतो विषयितापर्य्यन्तनिवेशनम्। हेतुनिष्ठसाध्याभाववद्वृत्तितात्वविशिष्टे प्रतिबन्धकतावच्छेदकविषयितापर्य्याप्त्यभावविवक्षणे साध्यप्रति-

(१) नचैवमित्यादि विवक्षणीयमितीत्यन्तं क्रोड़पत्रम्।

योगिकाभावमात्रनिवेशे व्यभिचारिण्यतिव्याप्तिः प्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वावगाहिन एव ज्ञानस्य प्रतिबन्धकतया तदघटितविषये प्रतिबन्धकज्ञानविषयिताया अपर्य्याप्तेः, साध्यतावच्छेदकावच्छिन्नसाध्याभावनिवेशश्च न सम्भवतीति(१) तदुपेक्षितं, व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वविषयितायां प्रतिबन्धकतावच्छेदकत्वाभावात् अतिव्याप्तिरतः सामान्य इत्युक्तम्। प्रकृतानुमितिपदं प्रकृतानुमितिसामान्यपरमन्यथा व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभावविषयकसमूहालम्बनात्मकप्रकृतानुमिति–प्रतिबन्धकतावच्छेदकत्वस्य हेतुनिष्ठताद्दशसाध्याभाववद्वृत्तित्वविषयिताया अपि सत्त्वात् सद्धेतावपि लक्षणगमनासम्भवात्। एवं प्रकृतेत्यनुपादाने कामिनीजिज्ञासादौ प्रसिद्धा या अनुमितिसामान्यप्रतिबन्धकता तदवच्छेदकत्वाभावो धूमाभाववद्वृत्तित्वादिविषयितायामक्षत एव तद्विषयकज्ञानस्य अन्यसाध्यकान्यलिङ्गकान्यसंसर्गकानुमित्यप्रतिबन्धकत्वादतः 'प्रकृतेति तत्साध्यक तद्धेतुकतत्संसर्गकपरं, सद्धेतुनिष्ठव्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वविषयिताया अनुमितिप्रतिबन्धकस्वरूपासिद्ध्यादि-(२) ज्ञानवृत्तित्वादसम्भवः स्यादतो यन्निष्ठसाध्याभाववद्वृत्तित्वविषयकज्ञानसामान्यस्य(३)

---

(१) हेतुनिष्ठसाध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वासम्भवेनासम्भवापत्तेरिति शेषः।

(२) अनुमितिजनकज्ञानविरोधित्वं लक्षणघटकमित्याभिप्रायेण स्वरूपासिद्ध्याद्युत्कीर्त्तनम्।

(३) यन्निष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयिताशालिज्ञानसामान्यस्येत्यर्थः।

अनुमित्यप्रतिबन्धकत्वमुपेत्य निरुक्तविषयितासामान्येऽनुमितिप्रतिबन्धकतावच्छेदकत्वाभावपर्य्यन्तानुधावनम् । अवच्छेदकत्वञ्च स्वरूपसम्बन्धविशेषः । न च धूमाभाववद्वृत्तितात्वेन घटादिविषयकज्ञानस्यानुमितिप्रतिबन्धकतया धूमाभाववद्वृत्तित्वत्वविशिष्टविषयिताशालिज्ञानत्वेन प्रतिबन्धकताकल्पनस्यासम्भवात् तादृशविषयितायां प्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वासत्त्वेनातिव्याप्तिरिति वाच्यम् । धूमाभाववद्वृत्तित्वत्वप्रकारितानिरूपितविषयिताशालिज्ञानत्वेन भ्रमसाधारणप्रतिबन्धकताकल्पनसम्भवात् तादृशविषयितात्वेन वास्तवधूमाभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयिताया अपि प्रतिबन्धकतावच्छेदकत्वस्याक्षतत्वात् । न चैवं समानाधिकरणधर्म्मावच्छिन्नसाध्याभाव--व्यधिकरणधर्म्मावच्छिन्नसाध्याभावद्वयविशेषिताधिकरणवृत्तित्वावगाहिनः समानाधिकरणधर्म्मावच्छिन्नाभावांशे भ्रमरूपज्ञानस्य (१) विषयिताया व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तितात्वविशिष्टनिरूपितत्वात् समानाधिकरणधर्म्मावच्छिन्नसाध्याभावविषयितानिरूपिताधिकरणविषयितानिरूपितविषयितात्वेन च प्रतिबन्धकतावच्छेदकत्वादव्याप्तिरिति वाच्यम् । हेतुसामानाधिकरण्यविशिष्टसाध्याभावत्वविशिष्टनिरूपितविषयितायां प्रतिबन्धकतावच्छेदकत्वाभावस्य विवक्षणीयत्वात् उक्तभ्रमे च समानाधिकरणधर्म्मावच्छिन्नाभावनिरूपितविष-

(१) समानाधिकरणधर्म्मावच्छिन्नाभावांशे प्रमारूपत्वे तादृशज्ञानविषयिताया हेतुनिष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टानिरूपितत्वेन लक्षणाघटकत्वान्न दोष इति भ्रमत्वोत्कीर्त्तनम् ।

यितायास्तादृशविशिष्टनिरूपितत्वाभावेन तस्या एव च प्रतिबन्धकतावच्छेदकत्वेनाव्याप्त्यनवकाशात्। न चैवं हेतुसमानाधिकरणव्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव यत्र हेतुसमानाधिकरणसाध्याभावत्व-समानाधिकरणधर्म्मावच्छिन्नसाध्याभावत्वाभ्यां भानं तादृशभ्रमविषयितायाः हेतुसमानाधिकरणसाध्याभावत्वविशिष्टनिरूपितत्वात् समानाधिकरणधर्म्मावच्छिन्नाभावत्वावच्छिन्नविषयतात्वेन प्रतिबन्धकतावच्छेदकत्वाच्चाव्याप्तिरिति वाच्यम्। अनुयोगिताद्वयावच्छिन्नानिरूपितत्वेन तादृशविषयितायाः निवेशनीयत्वात्। अथ यत्र ज्ञाने हेतुसमानाधिकरणतया भासमाने व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावे व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्व-साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वोभयसम्बन्धेन साध्यस्यैका प्रकारता तादृशज्ञानीयव्यधिकरणधर्म्मावच्छिन्नाभावविषयितायां साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टाभावनिरूपितत्वस्य विषयीभवदभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वासत्त्वेनासम्भवेऽपि व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टाभावनिरूपितत्वस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धविषयितानिरूपकविषयितात्वेनानुमितिप्रतिबन्धकतावच्छेदकत्वस्य चाक्षतत्वादव्याप्तिर्दुर्व्वारैवेति चेन्न, तादृशतादृशभ्रमस्याप्रामाणिकत्वात् प्रामाणिकत्वे च संसर्गीयविषयिताद्वयानिरूपकत्वेनाभावविषयितायाः विशेषणीयतया सामञ्जस्यात्। अथ साध्यरूपविशेषणविशिष्टस्याभावस्य विषयितानिरूपकतया लक्षणघटकत्वे साध्याभावयोः सम्बन्ध-

स्यापि सम्बन्धविधया लक्षणघटकत्वमावश्यकं स च सम्बन्धः साध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकत्वरूपः, व्यधिकरणघटत्वाद्यवच्छिन्नप्रतियोगिताकत्वरूपश्चाननुगत इति प्रथमस्य निवेशे केवलान्वयिनि साध्यविशेषिताभावस्यैवाप्रसिद्धिः व्यतिरेकिसाध्यकसद्धेतौ च तादृशहेतुसमानाधिकरणाभावाप्रसिद्धिरित्यसम्भवः चरमस्य निवेशे च सर्व्वत्र व्यभिचारिण्यतिव्याप्तिः, प्रतियोगितावच्छेदकधर्म्माणाञ्चोपलक्षणीभूतेन केनचिद्धर्म्मेणानुगमस्य निवेशो न सम्भवति प्रतियोगितावच्छेदकोपलक्षणस्य सम्बन्धघटकतया अभानात्। न चावच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगितायाा एव सम्बन्धविधया निवेशान्नाननुगमनिबन्धनो दोष इति वाच्यम्। अवच्छेदकावच्छिन्नत्वानिवेशेषितप्रतियोगिताविषयकाभावज्ञानस्य प्रतियोगिमत्ताज्ञानाविरोधितया तज्ज्ञानाविरोधिनः प्रतियोगिविशेषिताभावज्ञानस्य चानुभवविरुद्धतया अवच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगितायाः संसर्गतया अभानात्। न च स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यतावच्छेदकविशेषित एवाभावो निवेश्यो न तु साध्यविशेषितः, वह्नित्वादिना घटाद्यभाव एव वह्न्यादिसाध्यकधूमादिहेतुकस्थले लक्षणघटक इति वाच्यम्। प्रमेयत्वाद्यवच्छिन्नसाध्यके तादृशाभावाप्रसिद्धेः (१) एवं स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन वह्नित्वादिविशेषिते वह्नित्वादिना घटादेरभावे भासमाने यत्र सम्बन्धघटकप्रतियोगितायां बाधितस्य वह्न्यानिष्ठत्वस्य भानं तादृशज्ञानीयाभावविषयि-

(१) सामान्यरूपेण विशेषाभावानभ्युपगमात् अभ्युपगमे त्वाह, एवमिति।

तया उक्तसम्बन्धेन साध्यतावच्छेदकविशिष्टाभावनिरूपिततया अनुमितिविरोधितया चानुपपत्तेर्दुर्व्वारत्वात् स्वावच्छिन्नसाध्यवृत्तित्वविशिष्टप्रतियोगितानिवेशे च सर्व्वत्र सद्देतावप्रसिद्धेः, एवं प्रतियोगिविशेष्यतापन्न एवाभावे प्रतियोगिपारतन्त्र्येण समानाधिकरणधर्म्मस्य स्वातन्त्र्येण व्यधिकरणधर्म्मस्य स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रकारत्वं प्रामाणिकं न तु प्रतियोगिविशेष्यतानापन्ने वह्निर्नास्ति वह्नित्वेन घटो नास्तीत्येव प्रतीतिर्न तु वह्नित्वेन नास्तीति, तथाच विशिष्य प्रतियोग्यविशेषितस्योक्तसम्बन्धेन साध्यतावच्छेदकविशेषितस्याभावस्य विषयत्वनिरूपतया निवेशो न सम्भवत्येवेति । मैवम् । प्रतियोग्यादिविशेषिताभावीयत्वेन विशिष्टनिरूपितविषयिता लक्षणे न निवेश्यते अपि तु स्वनिरूपकहेतुसमानाधिकरणाभावनिष्ठो यः सम्बन्धस्तत्प्रतियोगिसाध्यनिष्ठतत्सम्बन्धावच्छिन्ननिरूपकतावच्छेदकताकत्वेन, यत्र हेतुसमानाधिकरणघटत्वाद्यवच्छिन्नवह्न्याद्यभावे वह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वसम्बन्धेन वह्न्यादेः साध्यस्य प्रकारता तादृशज्ञानविषयितानिरूपकाभावनिष्ठो न निरुक्ततन्निरूपकतावच्छेदकसम्बन्ध इति तद्विषयताव्युदासः, यत्र वह्नित्वावच्छिन्नघटाद्यभावे तन्निष्ठवह्नित्वावच्छिन्नप्रतियोगिताकत्वमेव वह्नेः सम्बन्धतया भासते तत्र तत्सम्बन्धप्रतियोगी न वह्निरपि तु घट एवेति साध्ये वास्तवतत्सम्बन्धप्रतियोगित्वनिवेशात्तादृशज्ञानीयाभावविषयिताव्युदासः। साध्यनिवेशाद्यत्र वह्नित्वेन घट एव वह्नित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन तत्सम्बन्धानुयोगिनि वह्नित्वावच्छि-

घटाभावे प्रकारस्तादृशज्ञानीयाभावविषयितायास्तत्सम्बन्धप्रतियोग्यवच्छिन्ननिरूपकताकत्वेऽप्यनुमितिविरोधित्वेऽपि च न दोषः। यत्र घटत्वावच्छिन्नवह्न्यभावे घटत्वावच्छिन्नप्रतियोगिताकत्वमेव वह्नित्वावच्छिन्नप्रतियोगिताकत्वत्वेन वह्नेः संसर्गतया भासते तादृशज्ञानस्य प्रामाणिकत्वे साध्यप्रतियोगिको हेतुसमानाधिकरणाभावानुयोगिको यद्धर्मावच्छिन्नप्रतियोगिताकत्वसम्बन्धः तद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसम्बन्धावच्छिन्नसाध्यनिष्ठनिरूपकतावच्छेदकताकत्वं विवक्षणीयमिति दिक् (१)। न च व्यभिचारज्ञानस्यानुमितिकारणव्याप्तिज्ञानं प्रत्येव प्रतिबन्धकत्वादनुमित्यप्रतिबन्धकत्वमिति व्यभिचारिण्यतिव्याप्तिरिति वाच्यम्। तज्जनकज्ञानप्रतिबन्धकतावच्छेदकत्वाभावस्यैव विवक्षितत्वात्। 'अनुमित्यविरोधित्वज्ञानस्य' अनुमितिप्रतिबन्धकतावच्छेदकत्वाभावप्रकारकज्ञानस्यैव, 'अनुमितिहेतुत्व' इति, एतन्मते निरुक्तविषयितासामान्येऽनुमितिप्रतिबन्धकतावच्छेदकत्वाभावस्यैव (२) अनुमितिकारणीभूतज्ञानविषयत्वादिति भावः। 'अनुमित्यविरोधितया' अनुमितिजनकज्ञानाप्रतिबन्धकतया, साध्याभाववद्वृत्तित्वज्ञानस्यानुमितिजनकत्वाभावादिति भावः। 'अतिप्रसङ्गादिति, हेतुनिष्ठसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वविषयितासामान्येऽनुमितिजनकज्ञानप्रतिबन्धकतावच्छेदक-

(१) अथ यत्र ज्ञान इत्यादिः इति दिगित्यन्तः पाठः कस्मिंश्चिदादर्शपुस्तके नास्ति।

(२) निरुक्तविषयितानिष्ठप्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावघटितस्यैवेति पा०।

त्वाभावस्याक्षतत्वादिति भावः। न च हेतुनिष्ठसाध्याभाववद्वृत्तित्व-विषयिता अनुमितिजनकज्ञानप्रतिबन्धकतावच्छेदिका इत्या-कारकज्ञानीयहेतुनिष्ठसाध्याभाववद्वृत्तित्वविषयिताया अपि तादृ-शविषयितासामान्यान्तर्गततया तत्र च प्रकृतव्याप्तिज्ञानप्रतिबन्ध-कतावच्छेदकत्वस्य सत्त्वेन नातिव्याप्तिरिति वाच्यम्। इत्थंरीत्या सद्धेतौ हेतुनिष्ठव्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वविषयि-तायामनुमितिजनकज्ञानविरोधित्वभ्रमरूपज्ञानीयहेतुनिष्ठसाध्या-भाववद्वृत्तित्वविषयितामादायासम्भवः स्यादिति तद्वारणाय इतर-विशेषणतापन्नतादृशसाध्याभाववद्वृत्तित्वनिरूपितविषयिताया एव लक्षणे निवेशनीयतया विषयिताविशेषणतापन्नसाध्याभाववद्-वृत्तित्वविषयितामादायातिव्याप्तिवारणासम्भवादिति।

साजात्यघटितलक्षणम्।

तत्त्वचिन्तामणि-दीधितिः।

केचित्तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्स-जातीया ये तत्तदधिकरणवृत्तित्वाभावास्तद्वत्त्वं तत्त्वं, साजात्यञ्च समानासमानाधिकरणधर्म्मावच्छिन्नप्रति-योगिताकत्वान्यतररूपेण, साध्याभावश्च पूर्व्वोक्तद्वितीय-रीत्या प्रत्येतव्यो व्याप्यवृत्तिश्च प्रतियोगितावच्छेदका-वच्छिन्नप्रतियोगिव्यधिकरणो वा तेन तत्तत्साध्यव्यक्तेर-व्याप्यवृत्तेर्वा साध्यस्याभाववति वृत्तावपि हेतोर्नाव्याप्तिः।

तद्वृत्तित्वाभावश्च तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकव्याप्यवृत्तिधर्म्मानवच्छिन्नप्रतियोगिताको बोध्यः, तेन साध्याभाववद्व्यक्तिविशेषवृत्तित्वस्य पार्थिवत्वादिविशेषितस्य द्वित्वाद्यवच्छिन्नस्य वा साध्याभाववद्वृत्तित्वस्याभावमादाय नातिप्रसङ्गः । अत्र च हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वं बोध्यं तेन वह्न्यभाववति स्वावयवे धूमस्य वृत्तावपि न दोषः, इत्यञ्च साध्याभावोऽपि हेतुतावच्छेदकसम्बन्धेन कस्यचिदधिकरणे वर्त्तमानो ग्राह्यः, तेन जातिमान् सत्त्वादित्यादौ हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वस्याप्रसिद्धावपि न क्षतिः ।

गादाधरी विवृतिः ।

मिश्ररीत्या साजात्यघटनेन साध्याभाववदवृत्तित्वरूपव्याप्तिं परिष्कृत्योपन्यस्यति,(१) 'यावन्त इति, धूमवान् वह्नेरित्यादौ व्यधिकरणधर्म्मावच्छिन्नाभावसजातीयस्य घटत्वादिना तदधिकरणवृत्तित्वाभावस्य हेतौ सत्त्वादतिव्याप्तिरतः 'यावन्त इति, तथाच यावदन्तर्गतसमानाधिकरणधर्म्मावच्छिन्नाभावसजातीयस्य तदधिकरणवृत्तित्वाभावस्य हेतावसत्त्वान्नातिव्याप्तिः तत्रैव समानाधिकरणधर्म्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वस्य व्यधिकरण-

---

(१) साध्याभाववद्वृत्तित्वाभावरूपां व्याप्तिमेव परिष्करोतीति पा० ।

धर्म्मावच्छिन्नाभावमादायातिव्याप्तिवारणाय 'प्रत्येकं तत्तत्सजातीया-इति, तथाच वक्ष्यमाणरूपेण व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभावस्य समानाधिकरणधर्म्मावच्छिन्नसाध्याभावसजातीयत्वाभावान्न दोषः। यावत्साध्याभावत्वेन साध्याभावानां निरूपकतया साजात्येऽन्वये व्यतिरेकिसाध्यके वह्निमान् धूमादित्यादौ याव साध्याभावनिरूपितत्वस्य क्वचिदपि साजात्येऽसत्त्वाद्यावत्साध्याभावसाजात्याप्रसिद्ध्याऽव्याप्तिरतस्तत्तद्व्यक्तित्वेन तेषां साजात्येऽन्वयलाभाय 'तत्तदिति। 'तत्तत्सजातीया इत्यनेनोपस्थितानां व्यधिकरणधर्म्मावच्छिन्नाभावसजातीयानां समानाधिकरण-व्यधिकरणधर्म्मावच्छिन्नाभावसजातीयानाम् एकस्मिन्नधिकरणवृत्तित्वाभावे एकत्व द्वयमितिरीत्याऽन्वये पुनर्व्यतिरेकिसाध्यकेऽव्याप्तिः एकत्वोभयसाजात्याभावात् अत एकैकाभावे पृथक् पृथगेकैकाभावसजातीयाभेदान्वय उपगन्तव्यः, एतदर्थतात्पर्य्यग्राहकं 'प्रत्येकमिति, बहुवचनान्तं तत्तदधिकरणवृत्तित्वाभावा इत्यस्य विशेषणं, यावत्साध्याभावत्वेन साध्याभावानामधिकरणेऽन्वये वह्निमान् धूमादित्यादौ तत्तद्भेदावृत्तित्वावच्छिन्नप्रतियोगिताकसाध्याभावघटितसमुदायाधिकरणतायाः क्वचिदप्यसत्त्वेनाव्याप्तिः स्यादतस्तत्तद्व्यक्तित्वेन साध्याभावानामधिकरणेऽन्वयलाभाय चरमं 'तत्तदिति, 'तत्त्वमिति अव्यभिचरितत्वमित्यर्थः। ननु तत्तत्सजातीयत्वं तत्तद्वृत्तिधर्म्मवत्त्वं तथाच समानाधिकरणधर्म्मावच्छिन्नाभाववृत्त्यभावत्वादिधर्म्मवत्त्वं व्यधिकरणधर्म्मावच्छिन्नाभावेऽपि वर्त्तत इति तस्यापि तत्सजातीयत्वाद्व्यभिचारिण्यतिव्याप्तिरत आह, 'साजात्य-

श्चेति, 'समानासमानाधिकरणेति समानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्व–व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेणेत्यर्थः, तृतीयार्थश्चाभेदः, तस्य च साजात्येन्वयः, विवक्षणीयमिति शेषः। तथाच 'तत्तज्जातीया इत्यस्य तत्तदभाववृत्तिताहृशान्यतररूपवन्त इत्यर्थः (१)। यद्यपि वह्नित्वावच्छिन्नाभावनिष्ठसमानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वं स्वसमानाधिकरणवह्नित्वाद्यवच्छिन्ना या प्रतियोगिता तन्निरूपकताकत्वरूपं तच्च तदधिकरणवृत्तित्वाभावेऽसम्भावितमेव, तथापि स्वासमानाधिकरणधर्म्मावच्छिन्ना या या प्रतियोगिता तदनिरूपकत्वं समानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वं, स्वसमानाधिकरणधर्म्मावच्छिन्ना या या प्रतियोगिता तदनिरूपकत्वमेव व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वमिह विवक्षितं तच्च साध्याभावतद्वृत्तित्वाभावोभयसाधारणमेव। समनियताभावैक्यमते च स्वाधिकरणावृत्तिधर्म्मावच्छिन्ना या प्रतियोगिता तन्निरूपकत्वरूपो व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वेत्यस्य यथाश्रुतार्थएवादरणीयः, तन्मते व्यधिकरणधर्म्मावच्छिन्नसाध्याभाव-तथाविधतद्वृत्तित्वाभावयोरैक्यात्ताहृशसाध्याभावस्य याहृशप्रतियोगितानिरूपकत्वं ताहृशप्रतियोगितानिरूपकत्वस्य तथाविधतद्वृत्तित्वाभावेऽपि सत्त्वात्। एतेन समनियताभावैक्यमते व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावस्य समवायादिसम्बन्धावच्छिन्नगगनत्वाद्यवच्छिन्नगगनाद्यभावाभिन्नतया तस्य समानाधिकरण-

(१) इत्यन्वयबोध इति पा०।

धर्म्मावच्छिन्नगगनादिनिष्ठप्रतियोगितानिरूपकत्वाद्व्यधिकरणधर्म्मावच्छिन्नाभावस्य निरुक्तरूपसत्त्वानुपपत्त्या समानाधिकरणधर्म्मावच्छिन्न-समानाधिकरणसम्बन्धावच्छिन्नप्रतियोगित्वानिरूपकत्वपर्य्यन्तनिवेशनायासो नोपादेयः,समनियताभावैक्यमते गगनाभावत्व-गगनाभावभिन्नत्वान्यतररूपेणापि साजात्यविवक्षणं सम्भवतीति ध्येयम्। ननु यावत्साध्याभावान्तर्गतानां तत्तत्साध्यव्यक्त्यभावादीनामधिकरणे हेतोर्वृत्त्या वह्निमान् धूमादित्यादावव्याप्तिरत आह, 'साध्याभावश्चेति, 'पूर्व्वोक्तद्वितीयरीत्येति 'यत्समानाधिकरणानामित्यादिद्वितीयलक्षणरीत्येत्यर्थः, साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाव एव साध्याभावपदेन विवक्षित इति भावः। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावविवक्षणे तथाविधवह्नि-घटोभयाभावमादाय तद्दोषतादवस्थ्यमतः प्रथमरीत्येति नोक्तं, साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावविवक्षणे वाच्यत्वत्वादिना-घटाद्यभावमादाय लक्षणसमन्वयसम्भवेऽपि स्वरूपसम्बन्धेन प्रमेयमात्रसाध्यकस्थले तथाविधाभावाप्रसिद्ध्या अव्याप्तिरतो व्यापकतावच्छेदकपर्य्यन्तानुधावनं, तथाच ज्ञेयत्वत्वादिना वाच्यत्वाभाव एव तथेति न दोषः। साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशे च वह्न्यादिसाध्यकस्थले तार्णतार्णदहनोभयाभावमादाय दोषस्य व्यासज्यवृत्तिधर्म्मानवच्छिन्नत्वं प्रतियोगितायान्निवेश्य वारणेऽपि सत्तादिसाध्यकस्थले विशिष्टसत्ताद्यभावमादाय दोष इति तादृशाभावो न निवेशितः। व्यापकतावच्छेदकावच्छिन्नप्रति-

योगिता च न्यूनवृत्तिधर्म्मावच्छिन्ना अतिरिक्तवृत्तिधर्म्मावच्छिन्ना वा या या प्रतियोगिता तदन्यत्वेन विशेषणीया, तेन वह्न्यादिसाध्यकस्थले वह्नित्वादिना महानसीयवह्नि-घटान्यतराभावमादाय न दोषः । न्यूनवृत्तित्वमतिरिक्तवृत्तित्वञ्च विरुद्धव्यावृत्तं निर्वाच्यं (१) नातो व्यधिकरणधर्म्मावच्छिन्नाभावासंग्रहः । व्यापकता च साध्यतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या तेन संयोगादिना वह्न्यादिसाध्यकस्थले समवायादिना वह्न्याद्यभावमादायासम्भववारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेन प्रतियोगिताया विशेषणीयतया समवायादिना द्रव्यत्वादिसाध्यके विषयतादिसम्बन्धेन साध्यव्यापकस्य ज्ञानादेः समवायादिनाभावमादाय दोषानवकाशः । तादात्म्यसम्बन्धेन प्रमेयसाध्यकस्थले समवायित्वादिरूपव्यधिकरणधर्म्मावच्छिन्नप्रतियोगितावच्छेदकताकभेद एव लक्षणघटकः, समनियताभावैक्यमते तादृशभेदस्य व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकात्यन्ताभावाभिन्नतया व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वेन तत्साजात्यस्य सम्भवात् ।

यत्तु संयोगेन प्रमेयत्ववान्नेति प्रतीतिसाक्षिकः संयोगावच्छिन्नप्रमेयत्वनिष्ठप्रतियोगितावच्छेदकताकभेद एव लक्षणघटकः अत्यन्ताभावस्येव तेन सम्बन्धेन तदवृत्तिर्यो धर्म्मस्तत्सम्बन्धेन तदवच्छिन्नप्रतियोगितावच्छेदकताकभेदस्याप्युक्तप्रतीतिबलात् सि-

(१) विरुद्धव्यावृत्तं न्यूनवृत्तित्वमतिरिक्तवृत्तित्वञ्च स्वसमानाधिकरणाभावप्रतियोगित्वे सति स्वसामानाधिकरण्यं न्यूनवृत्तित्वं, स्वाभाववद्वृत्तित्वे सति स्वसामानाधिकरण्यम् अतिरिक्तवृत्तित्वम् ।

द्विरिति, तन्न, वह्निमान् धूमात् गुणवान् द्रव्यत्वादित्यादौ विषयितादिसम्बन्धेन वह्नित्व-गुणत्वादिमतः साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावव्यावर्त्तनाय व्यापकतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वेन प्रतियोगितावच्छेदकताया अवश्यनिवेशनीयतया तादृशाभावस्य प्रामाणिकत्वेऽपि लक्षणघटकत्वासम्भवात्।

ननु कपिसंयोगी एतद्वृक्षत्वादित्यादौ कपिसंयोगत्वावच्छिन्नकपिसंयोगाद्यभावस्यापि लक्षणघटकतया तदधिकरणे च हेतोर्वृत्तेरव्याप्तिः। न च साध्यतावच्छेदकावच्छिन्नव्यापकताशरीरे प्रतियोगिवैयधिकरण्यनिवेशस्य निष्फलतया कपिसंयोगत्वादेः साध्यव्यापकतावच्छेदकत्वाभावान्न तादृशाभावानां लक्षणघटकतेति वाच्यम्। संयोगेन वह्न्यादिसाध्यकस्थले वह्नित्वादीनां संयोगरूपसाध्यतावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकत्वसम्पत्त्यर्थं व्यापकताशरीरे प्रतियोगिवैयधिकरण्यस्यावश्यकत्वात् अन्यथा साध्यवत्युत्पत्तिकालावच्छेदेन वह्नित्व-द्रव्यत्वाद्यवच्छिन्नस्य संयोगसम्बन्धेनाभावसत्त्वात् साध्यतावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकस्यैवाप्रसिद्धिप्रसङ्गात् तथाच तत्तदधिकरणपदेन तत्तदभावीयव्याप्यवृत्तितानिरूपकाधिकरणमेव विवक्षणीयं व्याप्यवृत्तितानिरूपकत्वञ्च निरवच्छिन्नाधेयतानिरूपकत्वम्, एवञ्च संयोगाभावस्य तथाविधाधिकरणं गुणादिरेवेति न दोषः। इत्थञ्च कपिसंयोगाभाववान् कपिसंयोगाधिकरणत्वाभाववान् वा मेयत्वादित्यादौ कपिसंयोग-तदधिकरणत्वादिरूपाणां यावत्साध्याभावान्तःपातिनां तथाविधाधिकरणाप्रसिद्ध्या अव्याप्तिरतः साध्याभावं व्याप्यवृत्तित्वेन

विशिनष्टि, व्याप्यवृत्तिश्चेति, तथाच तादृशाभावस्य तथाविधयावदभावान्तर्गततया तथाविधाधिकरणाप्रसिद्धावपि न क्षतिः। व्याप्यवृत्तित्वञ्च निरवच्छिन्नवृत्तिकत्वं न त्ववच्छिन्नवृत्तिकान्यत्वं, तथा सति संयोगेन धूमादिसाध्यके व्यभिचारिणि संयोगेन धूमत्वाद्यवच्छिन्नधूमाद्यभावस्यावच्छिन्नवृत्तिकतया अयोगोलकान्यत्वाद्यभावस्य च साध्यतावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहेण व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघटकतया अतिव्याप्तिः, एवञ्च वह्न्यभावसंयोगाद्यभावस्यापि क्वचिन्निरवच्छिन्नवृत्तिकत्वेन लक्षणघटकतया तदीयव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वाभावमादाय दोषवारणायाधिकरणपदस्य व्याप्यवृत्तितानिरूपकाधिकरणपरत्वमावश्यकमित्यवधेयम्। कालिकसम्बन्धावच्छिन्नप्रतियोगिताके आकाशाभावाभावे साध्ये आत्मत्वादिहेतावव्याप्तिः व्याप्यवृत्तेः साध्याभावस्याकाशाभावस्य व्याप्यवृत्तितानिरूपकाधिकरणे आत्मादौ हेतोर्वृत्तेरतस्तत्तदभावीयप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकाधिकरणमेव तत्तदधिकरणपदेन विवक्षणीयं, प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशनादेतद्रूपान्यत्वविशिष्टगुणत्ववान् गुणत्वादित्यादौ समवायरूपसाध्यतावच्छेदकसम्बन्धघटितविषिष्टसाध्यव्यापकतावच्छेदकविशिष्टगुणत्वत्वाद्यवच्छिन्नाभावस्य प्रतियोगिवैयधिकरण्यनिरूपकतया हेतुमत्यसत्त्वेऽपि नातिव्याप्तिः, तथाच कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशत्वाभावाभावादिसाध्यकात्मत्वादिहेतावव्याप्तिः तत्र व्याप्यवृत्ति-

यावत्साध्याभावान्तःपातिन आकाशत्वाभावादेः प्रतियोगिता-वच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्धेः कालेऽप्याकाशावच्छेदेन तादृशसाध्यरूपतदभावीयप्रतियोगिसत्त्वात् सर्व्वत्रैव तादृशाभावस्य प्रतियोगिसमानाधिकरणत्वादतो व्याप्य-वृत्तित्वमुपेक्ष्याभावे प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधि-करण्यमेव विशेषणमाह, 'प्रतियोगितावच्छेदकावच्छिन्नेति, अत्र च समनियताभावैक्यमते विशेषामेव व्यधिकरणधर्म्मावच्छिन्नाभाव-प्रतियोगितया तत्प्रतियोग्यनधिकरणाप्रसिद्ध्या तदसंग्रहः विशिष्ट-साध्यव्यापकतावच्छेदकावच्छिन्नयत्किञ्चित्प्रतियोगिताश्रयवैयधिक-रण्यनिवेशे च वाच्यत्वत्वादिना घटाद्यभावस्य घटादिवैयधिकरण्येन लक्षणघटकतानिर्व्वाहेऽपि प्रतियोगिभेदेन प्रतियोगिताभेदमते जन्यज्ञानविषयत्वादिसाध्यके किञ्चित्कालावच्छेदेन परमाण्वादौ प्रसिद्धस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य यत्किञ्चित्प्रति-योग्यनधिकरणवृत्तेः प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणा-प्रसिद्ध्या अव्याप्तिः तथापि यत्किञ्चित्प्रतियोगितान्तर्भावेन तादृशा-धिकरणप्रसिद्धिसम्पादने यत्किञ्चित्प्रतियोगिताश्रयप्रतियोगिवैय-धिकरण्यनिरूपकाधिकरणे तत्र हेतोर्वृत्त्या अव्याप्तितादवस्थ्यम्। एवं वह्निमान् धूमादित्यादौ द्रव्यत्वाद्यवच्छिन्नस्य संयोगेन योऽभावस्तस्य द्रव्येऽप्युत्पत्तिकालावच्छेदेन वर्त्तमानस्य गुणादौ प्रतियोगिव्यधिकरणस्य प्रतियोगिवैयधिकरण्यनिरूपकाधिकरण-गुणादौ हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्या अव्याप्तेर्वारणाय हेतुतावच्छेदकसम्बन्धेन कस्यचिदधिकरणे प्रतियोगिवैयधिकरण्य-

मभावे विशेषणं देयम् एवञ्च एतद्रूपान्यत्वविशिष्टसत्तावान् जातिरित्यादौ समवायघटितसाध्यव्यापकतावच्छेदकविशिष्टसत्तात्वाद्यवच्छिन्नाभावस्य हेत्वधिकरणे सत्तादिरूपप्रतियोगिसमानाधिकरणतया व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव लक्षणघटकता स्यादित्यतिव्याप्तिरतः प्रतियोगितावच्छेदकावच्छिन्नत्वोपादानम्। अथ केवलान्वयिस्थले लक्षणघटकानां वाच्यत्वत्वाद्यवच्छिन्नघटाद्यभावानां सर्व्वेषामेव प्रतियोगितावच्छेदकवाच्यत्वत्वावच्छिन्नानधिकरणाप्रसिद्धिः। न च यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तित्वमेव निवेशनीयं तथाच समनियताभावानामैक्योपगमेन व्यतिरेकितावच्छेदकधर्म्मस्याप्युक्ताभावप्रतियोगितावच्छेदकतया प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वस्य प्रसिद्धया तेषां लक्षणघटकतेति वाच्यम्। तथा सति संयोगाभावसाध्यकस्थले संयोगाद्यात्मकाभावस्य यत्किञ्चित्प्रतियोगितावच्छेदकसमवेतसामान्याभावत्वावच्छिन्नानधिकरणवृत्तित्वात्तद्व्यावर्त्तनासम्भवात् विशिष्टसाध्यव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदकविशेषणे उक्तस्थले तादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणाप्रसिद्धेर्द्दुर्व्वारत्वात्, प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वनिवेशे च व्यधिकरणधर्म्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यप्रसिद्धया प्रतियोगिवैयधिकरण्यं दुर्घटम्। अत्र केचित्, प्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिसमानाधिकरणा ये ये तदन्यत्वं व्यधिकरणान्तार्थः, न तु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वं, व्यधिकरणधर्म्मावच्छि-

न्नाभावस्य विशिष्टप्रतियोग्यप्रसिद्धा असंग्रहात्। न चैवं सति धूमवान् वह्नेरित्यादौ संयोगसम्बन्धघटितव्यापकतावच्छेदकधूमत्वाद्यवच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकानां धूमाभावानामुत्पत्तिकालावच्छेदेन धूमादिमति वृत्तेर्व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणतया अतिव्याप्तिरिति वाच्यम्। साध्यतावच्छेदकसम्बन्धेन व्यापकतामनिवेश्य येन सम्बन्धेन व्यापकता तत्सम्बन्धावच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभावं निवेश्य विषयतासम्बन्धेन साध्यव्यापकस्य ज्ञानस्य समवायसम्बन्धावच्छिन्नाभावमादायोक्तदोषस्य वारणीयतया (१) अयोगोलकभेदादेरभावमादायैवातिव्याप्तिवारणसम्भवात् यादृशप्रतियोगितावच्छेदको यो धर्म्मस्तद्विशिष्टतादृशप्रतियोगिताश्रयसामानाधिकरण्यं विवक्षणीयं तेन समनियताभावैक्यमते वाच्यत्वादिना घटाद्यभावस्यापि घटत्वादिना वाच्यत्वाद्यभावाभिन्नतया वाच्यत्वादिप्रतियोगिकत्वेन प्रतियोगितावच्छेदकवाच्यत्वत्वादिविशिष्टवाच्यत्वादिरूपप्रतियोगिसामानाधिकरण्येऽपि न क्षतिः। न चैवमपि वाच्यत्वादिसाध्यकस्थले सर्व्वेषामेवाभावानां पूर्व्वक्षणादिवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणतया प्रतियोग्यसमानाधिकरणाभावाप्रसिद्धिरिति वाच्यम्। स्वावच्छेदकविशिष्ट(२)स्वाश्रयाधिकरणवृत्त्यभावीयप्रतियोगिताभिन्नत्वेन व्यापकतावच्छेदकावच्छिन्नप्रतियोगिता विशेषणीयेत्यत्रैव प्रतियोगिता-

(१) द्रव्यत्वसाध्यकस्थले दोषस्य वारणीयतयेति पा०।

(२) उभयत्र स्वपदं प्रतियोगितापरम्।

वच्छेदकेत्यादेस्तात्पर्य्यात् । वाच्यत्वाद्यवच्छिन्नघटादिनिष्ठप्रतियोगितायाः स्वावच्छेदकविशिष्टस्वाश्रयाप्रसिद्ध्या निरुक्तप्रतियोगिताभिन्नत्वेन तन्निरूपकाभावमादाय वाच्यत्वादिसाध्यकस्थले लक्षणसमन्वयसम्भवात् । न च तथापि एतदभावभिन्नं मेयत्वादित्यादौ साध्यव्यापकतावच्छेदकसमानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावस्य एतदभावमात्रवृत्तेरभावमात्राधिकरणकतया अधिकरणस्वरूपत्वादेतदभावभेदादिरूपप्रतियोगिसमानाधिकरणतया निरुक्तप्रतियोगिताभिन्नव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकोऽभावो व्यधिकरणधर्म्मावच्छिन्नाभाव एवेत्यतिव्याप्तिरिति वाच्यम् । स्वावच्छेदकविशिष्टस्वाश्रयाधिकरणे स्वनिरूपकाभावत्वेन वर्त्तते योऽभावस्तदीयप्रतियोगिताभिन्नत्वेन च व्यापकतावच्छेदकावच्छिन्नप्रतियोगिताया विशेषणीयतया एतदभावाधिकरणे च एतदभावभिन्ने एतदभावरूपैतद्भावभेदाभावस्य वृत्तावपि तादृशाधिकरणे एतदभावभेदो नास्तीत्यप्रतीत्या एतदभावभेदत्वावच्छिन्नप्रतियोगिताकाभावत्वेन तस्यावृत्तित्वादेतदभावभेदत्वावच्छिन्नप्रतियोगितायां निरुक्तप्रतियोगिताभेदस्याक्षतत्वादित्याहुः। तच्चिन्त्यं, व्यापकताघटकसम्बन्धावच्छिन्नाभावनिवेशे व्यापकताशरीरे प्रतियोगिवैयधिकरण्यस्याभावाविशेषणत्वेऽपि संयोगादिना धूमादिसाध्यकव्यभिचारिण्ययोगोलकान्यत्वाभावमादायातिव्याप्तिवारणसम्भवात् तत्र तन्निवेशप्रयोजनाभावेन (१) अव्याप्यवृत्तिसाध्याभावमादायाव्याप्त्यनवकाशात् अभावे व्याप्यवृत्तित्वादि-

(१) तत्र व्यापकतायां प्रतियोगिवैयधिकरण्यनिवेशप्रयोजनाभावेन ।

विशेषणव्यावृत्त्यसङ्गतेः, अस्तु वा साध्यव्यापकतावच्छेदकस्यापि साध्यवन्निष्ठव्यधिकरणधर्म्मावच्छिन्नाभावप्रतियोगितानवच्छेदकतया तदभावव्यावर्त्तनाय व्यापकताशरीरे प्रतियोगिवैयधिकरण्यप्रवेश-स्तथाप्येतादृशप्रतियोग्यसामानाधिकरण्यविवक्षणे तस्य(१) अव्याप्ति-वारणप्रयोजनकत्वाभिधानासङ्गतेः, अभावे तदनिवेशे व्याप्यवृत्ति-साध्यकेऽपि यावत्साध्यवद्विषयकजन्यज्ञानव्यक्तिविशेषस्य प्रतियोगि-वैयधिकरण्यघटितसाध्यव्यापकताश्रयत्वात् कालविशेषावच्छेदेन हेतुमति तदभाववृत्तेरसम्भवस्यैव प्रसङ्गात्। अत्र वदन्ति(२), प्रति-योगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणे वृत्तित्वमेव तदर्थः(३) अथ (४) व्यधिकरणधर्म्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकवि-शिष्टप्रतियोग्यप्रसिद्ध्या केवलान्वयिसाध्यके प्रतियोगिव्यधिकरण-तादृशाभावाप्रसिद्धेः (५) अव्याप्तिरिति चेन्न (६) प्रतियोगिताव-च्छेदकावच्छिन्नप्रतियोग्यनधिकरणत्वं हि स्वप्रतियोगितावच्छेद-कावच्छिन्नस्वप्रतियोगिवृत्तिप्रतियोगितावच्छेदकताकभेदवत्त्वं (७) ज्ञेयत्वत्वादिना वाच्यत्वाद्यभावस्य तादृशभेदसामानाधिकरण्य-

---

(१) व्याप्यवृत्तित्वादिविशेषणस्य।

(२) अत्र वदन्तीत्यत्र परे त्विति पा०।

(३) प्रतियोगितावच्छेदकेत्यादेरर्थः इति पा०।

(४) अथेत्यत्र न चेति पा०।

(५) प्रतियोगितावच्छेदकविशिष्टप्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धेरिति पा०।

(६) इति चेन्नेत्यत्र इति वाच्यमिति पा०।

(७) स्वप्रतियोगिवृत्तिप्रतियोगितावच्छेदकताकभेदवद्वृत्तित्वमिति पा०।

रूपं (१) प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यं सुघटमेव, व्यधिकरणधर्म्मावच्छिन्नप्रतियोगितावच्छेदकताकस्य (२) ज्ञेयत्वत्वेन वाच्यत्ववद्भेदस्यैव तथात्वात्, कपिसंयोगाभाववान् मेयत्वादित्यादौ कपिसंयोगादिरूपसाध्याभावस्यापि ज्ञेयत्वत्वादिना कपिसंयोगाभावादिमद्भेदसामानाधिकरण्यसत्त्वात् तस्य च स्वप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्धा अव्याप्तिरतः स्वप्रतियोगितावच्छेदकावच्छिन्नत्वं भेदप्रतियोगितावच्छेदकतायां विशेषणं, तत्रैव कपिसंयोगात्मकाभावीयप्रतियोगितावच्छेदकीभूतसमवेतसामान्याभावत्वावच्छिन्नसमवेतसामान्याभाववद्भेदस्यापि निरुक्तप्रतियोगितावच्छेदकतानिरूपकत्वात् तत्सामानाधिकरण्यमादाय कपिसंयोगाद्यात्मकाभावानां प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यवारणाय साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदकं विशेषणीयं, समवेतसामान्याभावत्वादेश्च कपिसंयोगाभावादिव्यापकतानवच्छेदकतया न दोषः। न चात्र साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदके विशेषिते तत्तत्साध्यव्यक्त्यभावादीनामीदृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यं न घटते साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूत–स्वप्रतियोगिताव-

(१) तादृशभेदसमानाधिकरणतयेति पा० ।

(२) व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिवृत्तिप्रतियोगितावच्छेदकताकभेदस्येति पा० ।

च्छेदकाप्रसिद्धेः तथाच 'साध्याभावश्चेत्यादिना साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावविवक्षणासङ्गतिरिति वाच्यम्। 'साध्याभावश्चेत्यादिग्रन्थस्य व्याप्यवृत्तित्वनिवेशकल्पे अभावे साध्यतावच्छदकावच्छिन्नेत्यादिविशेषणदानपरत्वात्, द्वितीयकल्पे च प्रतियोगितावच्छेदकावच्छिन्नेत्यत्र प्रतियोगितावच्छेदकस्य तादृशव्यापकतावच्छेदकत्वेन विशेषणात्तादृशरूपावच्छिन्नप्रतियोगिताक एवाभावो लक्षणघटक इत्यर्थकत्वात्। एतत्कल्पे अभावांशे तादृशप्रतियोगिताकत्वविशेषणविरहेऽपि क्षतिविरहात् तत्रैव कपिसंयोगाभावत्वादिना घटादिमद्भेदसामानाधिकरण्यमादाय तद्दोषवारणाय स्वप्रतियोगिवृत्तित्वं भेदप्रतियोगितावच्छेदकतायां विशेषणं, संयोगसामान्याभावादेरपि कपिसंयोगाद्यात्मकाभावप्रतियोगितया कपिसंयोगाद्यत्मकाभावस्य प्रतियोगितावच्छेदककपिसंयोगाभावत्वादिना संयोगसामान्याभाववद्भेदसामानाधिकरण्यमादाय तद्दोषतादवस्थ्यवारणाय यादृशप्रतियोगितावच्छेदको यो धर्म्मस्तदवच्छिन्नतादृशप्रतियोगिताश्रयवृत्तित्वमेव भेदप्रतियोगितावच्छेदकतायां निवेशनीयं, कपिसंयोगाभावत्वञ्च कपिसंयोगाभावनिष्ठप्रतियोगितायामेवावच्छेदकं संयोगसामान्याभावस्य न तादृशप्रतियोगिताश्रय इति न तादृशभेदमादाय दोषः। भेदप्रतियोगितावच्छेदकतायां स्वप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वमपि निवेशनीयं तेन कपिसंयोगाद्यात्मकाभावस्य कपिसंयोगाभावत्वाद्यवच्छिन्नकपिसंयोगाभावादिनिष्ठविषयितादिसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकभेदसामानाधि-

करणेऽपि न तद्दोषतादवस्थ्यम्। एवं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यनिरूपकत्वं स्वनिष्ठं यत्स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिनिष्ठप्रतियोगितावच्छेदकताकभेदसामानाधिकरण्यं तन्निरूपकत्वम् अतो व्यधिकरणधर्म्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यप्रसिद्धावपि न तादृशाधिकरणाप्रसिद्धिः(१)कपिसंयोगी एतद्वृक्षत्वादित्यादौ हेत्वधिकरणेऽपि द्रव्यत्वादिना कपिसंयोगादिमतः कपिसंयोगत्वादिना च द्रव्यत्वादिमतोभेदसत्त्वात्तस्यापि तादृशाधिकरणत्वापत्तिरतोऽवच्छिन्नान्तनिष्ठान्तयोरुपादानं, पूर्व्वक्षणादिवृत्तित्वविशिष्टस्वाभावत्वादिरूपप्रतियोगितावच्छेदकरूपेण कपिसंयोगादिमद्भेदमादाय तद्दोषतादवस्थ्यमतस्तत्प्रतियोगिताश्रयनिष्ठप्रतियोगितावच्छेदकतायां तदवच्छेदकावच्छिन्नत्वं विशेषणीयम्। एवं विशिष्टसाध्यव्यापकतावच्छेदकत्वेनापि प्रतियोगितावच्छेदकं विशेषणीयं, तेन संयोगी द्रव्यत्वादित्यादौ संयोगाभावस्य द्रव्यवृत्तित्वात्तत्प्रतियोगितावच्छेदकद्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नाभावत्वावच्छिन्नद्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नाभावनिष्ठप्रतियोगितावच्छेदकताकभेदवत्त्वस्य द्रव्ये सत्त्वात्तस्य न प्रतियोगिवैयधिकरण्यनिरूपकत्वापत्तिः। एवं सम्बन्धविशेषनिवेशनमपि (२) पूर्व्ववद्बोध्यमिति। तथाच स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक--

(१) प्रतियोगिवैयकरण्यनिरूपकाधिकरणाप्रसिद्धिः।

(२) स्वप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वं भेदप्रतियोगितावच्छेदकतायां निवेश्यं तेन कपिसंयोगी एतद्वृक्षत्वादित्यादौ नाव्याप्तिरिति।

रूपावच्छिन्ना यावत्यः प्रतियोगितास्तत्तदवच्छेदकावच्छिन्नतत्तदाश्रयनिष्ठप्रतियोगितावच्छेदकताकभेदवदधिकरणवृत्तित्वव्यापकतत्तत्सजातीयप्रतियोगितानिरूपकाभाववत्त्वमेवेति निष्कर्षः (१) साजात्यञ्च पूर्व्वोक्तरूपेणेति (२) संक्षेपः। अभावे यथाश्रुतसाध्यप्रतियोगिकत्वं परित्यज्य प्रतियोगितावच्छेदके साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वविशेषणस्य व्याप्यवृत्तित्वादिविशेषणस्य च व्यावृत्तिमाह(३) 'तेनेति, 'तत्तत्साध्यव्यक्तेरभाववति हेतोर्वृत्तावपि नाव्याप्तिरिति योजना, एतद्रूपवान् एतद्रसादित्यादौ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणसाध्याभाववति हेतोरवृत्तेर्लक्षणगमनान्नासम्भवः (४)। अथ साध्यवति एतद्रूप-तद्रूपोभयत्वावच्छिन्नाभावसत्त्वेन तत्रापि लक्षणगमनासम्भवः। न च नासौ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः प्रतियोगितावच्छेदकीभूतोभयत्वेन रूपेण उभयवद्भेदस्य उभयवतोऽप्रसिद्धत्वेनाप्रसिद्धेरिति वाच्यम्। उभयत्वेनान्यतरवद्भेदस्य तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नतत्प्रतियोगिवृत्तिप्रतियोगितावच्छेद--

---

(१) इति निष्कर्ष इत्यनन्तरं 'एवं सम्बन्धविशेषनिवेशनमपि पूर्व्ववद्बोध्यमिति प्राहुः' इति पाठः कस्मिंश्चिदादर्शपुस्तके वर्त्तते।

(२) साजात्यञ्च समानाधिकरणधर्म्मावच्छिन्नत्व-व्यधिकरणधर्म्मावच्छिन्नत्वान्यतररूपेणेतीति पा०।

(३) प्रयोजनमाहेति पा०।

(४) प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणसाध्याभाववन्निःसाध्यमेव तत्र हेतोरवृत्तेर्लक्षणगमनान्नासम्भव इति पा०।

कताकस्य उभयत्वेनान्यतराभाववति सत्त्वात् (१) तस्यापि (२) तादृशभेदमादाय तत्त्वात् (३) इति चेन्न, व्यासज्यवृत्तिधर्म्मानवच्छिन्नप्रतियोगिताकस्य स्वव्यापकसाध्यतावच्छेदकप्रतियोगिताकस्य वा अभावस्य निवेशे तादृशोभयाभावादिवारणं सम्भवति इत्यभिप्रायेणाव्याप्तिलिखनात्। 'अव्याप्यवृत्तेर्वेति। यद्यप्येतद्ग्रन्थस्य स्वयमुक्तस्याभावे व्याप्यवृत्तित्वादिविशेषणस्य प्रयोजनदर्शनपरत्वे साध्यपदं कपिसंयोगाभावादिपरमेव वाच्यं न तु कपिसंयोगादिपरं, कपिसंयोगादिसाध्यकस्थले कपिसंयोगाद्यभावस्य लक्षणघटकत्वेऽपि अधिकरणपदस्य व्याप्यवृत्तित्वादिनिरूपकाधिकरणपरताया अभावे व्याप्यवृत्तित्वादिनिवेशेऽपि आवश्यकत्वात्तदीयव्याप्यवृत्तितानिरूपकाधिकरणे गुणादौ हेतोरवृत्तेरव्याप्त्यनवकाशात्, कपिसंयोगाभावादेर्गुणादौ निरच्छिन्नवृत्तिकत्वादिरूपव्याप्यवृत्तित्वादिसत्त्वेन तादृशविशेषणेन व्यावर्त्तनासम्भवाच्च, तथाच कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावस्य लक्षणघटकत्वेऽपि तदीयव्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्धिरेवाव्याप्तिप्रयोजिका न तु तादृशाभावीयाव्याप्यवृत्तितानिरूपकाधिकरणे हेतोर्वृत्तिरिति 'वृत्तावपि हेतोरिति न सङ्गच्छते, तथाप्यभावे व्याप्यवृत्तितानिवेशानुपादाने यावदन्तर्गतकपिसंयोगादीनां व्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्धिः स्यादिति

---

(१) उभयत्वेनान्यतराभाववति साध्यवति सत्त्वादिति पा०।

(२) उभयत्वेनान्यतराभावस्यापीति।

(३) प्रतियोगिव्यधिकरणत्वात्।

तादृशाधिकरणपर्य्यन्तं न विवक्षणीयं तथा सति अव्याप्यवृत्ति-साध्यकस्थले हेतोः साध्याभाववद्वृत्तित्वनिबन्धनाव्याप्तिः सा च व्याप्यवृत्तित्वाद्युपादानान्न भवतीत्यभिप्रायः। अथवा कपिसंयोगा-दिसाध्यकस्थले हेतोः साध्याभावीयाव्याप्यवृत्तितानिरूपाधिकरण-वृत्तित्वं तत्स्थलीयाव्याप्तिवारकव्याप्यवृत्तितानिरूपकाधिकरण-वृत्तित्वनिवेशनौपयिकम् अतस्तदधीना या कपिसंयोगाभावादि-साध्यकस्थले कपिसंयोगाद्यात्मकाभावीयतादृशाधिकरणाप्रसिद्धि-निबन्धनाव्याप्तिस्तत्सम्पादकमपीति न तादृशग्रन्थासङ्गतिः। एतेन व्याप्यवृत्तितानिरूपकाधिकरणानिवेशे व्याप्यवृत्तिसाध्यकस्थलेऽपि क्षणविशेषवृत्तित्वविशिष्टसाध्याभावस्य प्रतियोगिवैयधिकरण्य-घटितसाध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकस्याव्याप्यवृत्ते-रधिकरणे हेतोर्वृत्त्या लक्षणगमनासम्भवात् असम्भव एव सम्भवती-त्यव्याप्तिरिति लिखनं न युज्यते इत्यपि निरस्तम्। ननु तत्तत्सा-ध्याभावाधिकरणवृत्तित्वस्य हेतुवृत्तितानवच्छेदकविशेषधर्म्म-व्यास-ज्यवृत्तिधर्म्मावच्छिन्नाभावमादाय व्यभिचारिण्यतिव्याप्तिस्तत्तत्सा-ध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावं निवेश्य तद्वार्य्यते चेत्, तदा व्यधिकरणधर्म्मावच्छिन्नसाध्याभावसजातीयस्य तादृशस्य तद्वद्वृत्ति-त्वत्वेन घटाद्यभावस्य प्रसिद्धिर्गुरुधर्म्मस्य प्रतियोगितावच्छेदकत्वा-ङ्गीकार एव सम्भवति, अन्यथा तादृशाभाववद्वृत्तित्वत्वरूपलघुधर्म्म-समनियततया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावा-प्रसिद्धेः, अन्यूनानतिरिक्तवृत्तित्वरूपावच्छिन्नत्वनिवेशे ह्रदवृत्तित्व-ह्रदान्यनिर्धूमवृत्तित्वोभयाभावादेर्निर्धूमवृत्तित्वत्वादिसमनियतप्र-

तियोगिताकतया तद्वति धूमादिसाध्यकवह्न्यादिहेतावतिव्याप्तेः, तत्तत्साध्याभाववद्वृत्तित्वत्वविशिष्टव्यापकतावच्छेदकरूपावच्छिन्नाभावादिनिवेशे च निर्धूमवृत्तित्वत्वादिना ह्रदवृत्तित्व-घटाद्यन्यतराभावमादाय (१) तद्दोषतादवस्थ्यमित्यन्यादृशमभावं तत्तदधिकरणवृत्तित्वाभावपदेन विवक्षति, 'तद्वदिति, व्यापकान्तमनवच्छिन्नान्तञ्च प्रतियोगिताविशेषणं,प्रथमविशेषणप्रयोजनमाह,'साध्याभाववद्व्यक्तिविशेषेति यत्र व्यक्तौ हेतुरपि न वर्त्तते तादृशह्रदादिव्यक्तीत्यर्थः, व्यभिचारनिरूपकहेत्वधिकरणमात्रवृत्तिर्योऽयोगोलकादिव्यक्तिविशेषावृत्तित्वादिरूपसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावः (२) तद्वद्व्यक्तिविशेषवृत्तित्वाभावस्य हेतावसम्भवात् किञ्चिद्विशिष्टस्य तादृशाभाववद्वृत्तित्वस्याभावमादायातिप्रसङ्गं दर्शयति, 'पार्थिवत्वादिविशेषितस्येति, अग्रिमेण 'साध्याभाववद्वृत्तित्वस्येत्यनेनान्वितं, वह्न्यादौ पार्थिवत्वादिविशेषणाभावात्तद्विशिष्टनिर्धूमवृत्तित्वाभावस्यापि तत्र सत्त्वात्तमादायेत्यर्थः, द्वितीयविशेषणप्रयोजनं दर्शयति, 'द्वित्वाद्यवच्छिन्नस्येति घट-निर्धूमवृत्तित्वोभयत्वाद्यवच्छिन्नस्येत्यर्थः, 'नातिप्रसङ्ग इति, ह्रदादिवृत्तित्वत्व-पार्थिवत्वादिविशिष्टनिर्धूमवृत्तित्वत्वावच्छिन्नाभावप्रतियोगिताया वह्न्यादिवृत्तिनिर्धूमवृत्तित्वाद्यवृत्तितया तत्तत्साध्याभाववद्वृत्तित्वत्वाद्यव्यापकत्वात्, द्वित्वाद्यवच्छिन्नाभाव-

(१) ह्रदवृत्तित्व-घटवृत्तित्वान्यतराभावमादायेति पा० ।

(२) अयोगोलादिव्यक्तिविशेषावृत्तित्वादिरूपस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपे अभेदेनान्वयः ।

प्रतियोगिताया द्वित्वादिवद्व्यासज्यवृत्तित्वविरहेण निर्धूमवृत्तित्वादिनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपनिर्धूमवृत्तित्वत्वादिव्यापकत्वसत्त्वेऽपि व्यासज्यवृत्तिधर्म्मावच्छिन्नत्वात्तादृशाभावानां लक्षणाघटकत्वादिति भावः। व्यासज्यवृत्तिधर्म्मस्य तत्तत्साध्याभाववद्वृत्तित्वनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वविरहात् तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकधर्म्मावच्छिन्नाभावनिवेशे द्वित्वाद्यवच्छिन्नाभावमादायातिप्रसङ्गस्य वारणसम्भवेऽपि प्रतियोगितायां व्यापकत्वविशेषणाप्रवेशे निर्धूमवृत्तित्वत्वादिना ह्रदादिवृत्तित्वघटान्यतराभावमादाय (१) अतिप्रसङ्गो न शक्यते वारयितुमिति तत्र तद्विशेषणप्रवेशस्यावश्यकत्वे तत्तदभाववद्वृत्तित्वत्वव्यापकधर्म्मावच्छिन्नायाः तत्तदभाववद्वृत्तित्वत्वव्यापकप्रतियोगितायाः समानाधिकरणधर्म्मावच्छिन्नत्वनियतत्वेन व्यधिकरणधर्म्मावच्छिन्नतदभावासंग्रहः, तत्तदभाववद्वृत्तितात्वव्यापकत्वेन विशेषितायां प्रतियोगितायां तत्तदभाववद्वृत्तितात्वव्यापकतावच्छेदकावच्छिन्नत्वं निवेश्य वाच्यत्वत्वादिना साध्याभाववद्वृत्तित्वाभावसंग्रहसम्भवेऽपि गौरवमिति व्यासज्यवृत्तिधर्म्मावच्छिन्नाभाववारणाय तादृशधर्म्मानवच्छिन्नत्वमेव लाघवान्निवेशयितुमुचितमिति (२) तदेव निवेशितं, व्यासज्यवृत्तित्वञ्च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वम्। 'साध्याभाववद्वृत्तित्वमिति साध्याभाववत्-

---

(१) ह्रदादिवृत्तित्व-घटवृत्तित्वान्यतराभावमादायेति पा०।

(२) तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकधर्म्मावच्छिन्नत्वापेक्षया लाघवान्निवेशयितुमुचितमितीति पा०।

सम्बद्धत्वमित्यर्थः, तेन तादात्म्यादिसम्बन्धेन वृत्तेरप्रसिद्धावपि न तत्सम्बन्धावच्छिन्नहेतुकस्थलेऽव्याप्तिः, सम्बन्धप्रतियोगित्वरूप-सम्बद्धत्वैकदेशे सम्बन्धे 'हेतुतावच्छेदकसम्बन्धेनेति तृतीयार्थाभेदान्वयः, 'वृत्तावपीति सम्बद्धत्वेऽपीत्यर्थः, 'न दोष इति, हेतुतावच्छेदकसम्बन्धानिवेशे वह्निमान् धूमादित्यत्र वह्न्यभाववत्संयुक्तत्वावच्छिन्नाभावप्रतियोगितया वह्न्यभाववत्समवेतत्वाद्यवृत्तितया सामान्यतो वह्न्यभाववद्वृत्तित्वत्वं प्रत्यव्यापकत्वेन तादृशाभावस्य लक्षणघटकत्वानुपपत्तेः, वह्न्यभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य तद्वृत्तित्वसामान्याभावस्य वह्न्यभाववत्समवेतत्ववति धूमेऽसत्त्वादव्याप्तिः प्रसज्यते, हेतुतावच्छेदकसम्बन्धनिवेशे च निर्वह्निसंयुक्तत्वत्वावच्छिन्नाभावस्यापि तादृशसम्बन्धावच्छिन्नसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वेन लक्षणघटकतया तमादाय लक्षणसमन्वय इति भावः । 'इत्यत्र' हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वविवक्षणे च, सतीति शेषः, एतदविवक्षणे च वक्ष्यमाणाप्रसिद्धिविरहादुपष्टम्भासङ्गतिः, 'हेतुतावच्छेदकसम्बन्धेन कस्यचिदधिकरणे वर्त्तमान इति अनुयोगितासम्बन्धेन हेतुतावच्छेदकसम्बन्धवद्वृत्तिरित्यर्थः, अथवा हेतुतावच्छेदकसम्बन्धेन धर्म्मवद्वृत्तिरित्येवार्थः, विशिष्य हेतुतावच्छेदकपुरस्कारेण हेतुमत्त्वनिवेशनसम्भवेऽपि बहुपदार्थघटितहेतुतावच्छेदकस्थले धर्म्मत्वेन निवेशापेक्षया तेन रूपेण निवेशे गौरवमिति सामान्यतो निवेशलाभाय 'कस्यचिदित्यभिहितम् । अथ द्रव्यं गुण-कर्म्मान्यत्वे सति सत्त्वादित्यादौ समानाधिकरणधर्म्मावच्छिन्नप्रतियोगिता-

कस्यापि साध्याभावस्य सत्तादिरूपहेतुसामानाधिकरण्यसम्भवेऽपि हेतुतावच्छेदकविशिष्टहेतुसमानाधिकरणनिरुक्तसाध्याभावानां व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वनियमात्ताद्दशहेतुसमानाधिकरणत्वेनाभावविशेषणे केवलव्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वरूपेणैव साजात्यविवक्षणं सम्भवतीति तन्निवेशनमेवोचितमिति चेन्न, तथा सति ताद्दशयावत्साध्याभावसजातीयवत्त्वस्यैव लक्षणत्वं सम्भवतीति व्यभिचारिणि समानाधिकरणधर्म्मावच्छिन्नाभावस्यापि विशिष्टहेतुसमानाधिकरणत्वेन लक्षणघटकतया तद्घटितयावदभावसजातीयाप्रसिद्धेरवातिव्याप्तिविरहात्, सद्धेतौ ताद्दशयावदभावसजातीयव्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकयत्किञ्चिदभावमादायैव लक्षणसमन्वयसम्भवादिति साध्याभाववद्वृत्तित्वाभाववत्त्वविशेषणवैयर्थ्यापत्तेः। 'हेतुतावच्छेदकसम्बन्धेनेति समवायादिसम्बन्धेनेत्यर्थः, 'साध्याभाववद्वृत्तित्वस्य' समानाधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य, 'न क्षतिरिति, ताद्दशसाध्याभावस्य समवायादिसम्बन्धानुयोग्यवृत्तितया व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात्तद्वति च ताद्दशसम्बन्धेनापि वृत्तेः प्रसिद्धेरिति भावः। अत्र च द्रव्यं गुणकर्म्मान्यत्वे सति सत्त्वादित्यादावव्याप्तिर्विशेष्य-विशेषणसम्बन्धस्य परम्परया हेतुत्वमभ्युपेत्य वारणीयेत्यभिप्रेत्य हेतुतावच्छेदकसम्बन्धेन किञ्चिद्यन्न्यधिकरणवृत्तित्वमभावे विवक्षितम्। यदि च सत्तादेरेव विशिष्टसत्तात्वादिना व्याप्यत्वं हेतुतावच्छेदकविशिष्टनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतासामान्ये तत्तत्साध्याभाव-

सजातीयतत्तदधिकरणानुयोगिकत्वाभावं तत्तत्साध्याभाववद्वृत्ति-तासामान्ये तत्तत्साध्याभावसजातीयहेतुतावच्छेदकसम्बन्धावच्छि-न्नत्वविशिष्टहेतुतावच्छेदकावच्छेद्यत्वाभावं वा निवेश्य निर्वाह्यते तदा जातिमान् सत्त्वादित्यादावुपदर्शिताप्रसिद्धिनिबन्धनाव्याप्ते-रुक्तविवक्षामन्तरेणैव (१) वारणं सम्भवतीत्यवधेयम्।

इति मिश्रस्य साजात्यघटितप्रथमलक्षणव्याख्या।

तत्त्वचिन्तामणि-दीधितिः।

मिश्रोक्तसाजात्यघटितद्वितीयलक्षणम्।

यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य व्यप्यवृत्तेरभावस्य प्रतियो-गितावच्छेदकेन धर्म्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वम-वच्छिद्यते तद्रूपवत्त्वं तत्त्वं साधनस्य तादृशाभावप्रतियो-गित्वं तदवच्छेदकत्वं वा साधनतावच्छेदकस्येति तु न वक्तव्यम् द्रव्यं सत्त्वादित्यादौ सत्त्वादेर्गुण-कर्म्मान्यत्ववि-शिष्टसत्तात्वाद्यवच्छिन्नप्रतियोगिताकतादृशाभावप्रति-योगित्वादतिव्याप्तेः ज्ञेयं प्रमेयादित्यादौ प्रमेयत्वादेस्ता-दृशप्रतियोगितानवच्छेदकत्वादव्याप्तेश्च प्रमेयत्वव्यधि-करणप्रतियोगित्वस्याप्रसिद्धेः।

---

(१) हेतुतावच्छेदकसम्बन्धेन कस्यचिदधिकरणे वर्त्तमानसाध्याभावविवक्षा-मन्तरेणैवेत्यर्थः।

गादाधरी विवृतिः ।

मिथ्यास्तु साध्याभाववद्वृत्तित्वाभावरूपव्याप्तेर्जातिमान् सत्त्वात् द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिमालोच्य सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वरूपामेव व्याप्तिं साजात्यादिघटनया परिष्कृतवन्तः तत्परिष्कृते च यथाश्रुते वक्ष्यमाणदोषमुद्धर्त्तुमभावप्रतियोगित्वस्थले स्वावच्छिन्नव्यापकतावच्छेदकतत्प्रतियोगितावच्छेदककत्वरूप पारिभाषिकतत्प्रतियोगितावच्छेदकत्वाश्रयहेतुतावच्छेदकवत्त्वं निवेशयंस्तादृशलक्षणमाह, 'यद्वेति, 'तादृशाः' व्याप्यवृत्तयः, 'साध्याभावाः' साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावाः, 'प्रत्येकन्तेषां सजातीयस्य व्यापकीभूतस्य' एकैकं तदभावसजातीयस्य तत्तदभावव्यापकीभूतस्य, 'व्याप्यवृत्तेरभावस्य','प्रतियोगितावच्छेदकेन धर्म्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते' प्रतियोगितावच्छेदकं यद्धेतुतावच्छेदकावच्छिन्ननिरूपितव्यापकतावच्छेदकं, 'तद्रूपवत्त्वं', 'तत्त्वं' तेन रूपेण व्याप्यत्वं, वह्निमान् धूमादित्यादौ वह्नित्वाद्यवच्छिन्नवह्न्याद्यभावसजातीयस्तद्व्यापकीभूतो धूमत्वाद्यवच्छिन्नधूमाद्यभावः, वह्नित्वाद्यवच्छिन्नघटाद्यभावसजातीयस्तद्व्यापकीभूतो धूमत्वाद्यवच्छिन्नघटाद्यभावस्तत्प्रतियोगितावच्छेदकं धूमत्वाद्यवच्छिन्नव्यापकतावच्छेदकमिति लक्षणसमन्वयः। व्यभिचारिणि धूमत्वाद्यवच्छिन्नव्यापकतावच्छेदकधूमत्वाद्यवच्छिन्नघटाद्यभाव-तादृशवह्नित्वाद्यवच्छिन्नवह्न्याद्यभावसजातीयतत्तदभावव्यापकवह्नित्वाद्यवच्छिन्नघटाद्यभाव-वह्नित्वाद्यवच्छिन्नवह्न्याद्यभावप्रतियोगितावच्छेद-

कवह्नित्वादेर्वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वेऽपि तादृशयावत्साध्याभावान्तर्गतधूमत्वाद्यवच्छिन्नधूमाद्यभावसजातीयतद्व्यापकाभावप्रतियोगितावच्छेदकस्य कस्यापि वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वाभावान्नातिव्याप्तिः। प्रथमाभावे व्याप्यवृत्तित्वविशेषणात् कपिसंयोगी एतद्वृक्षत्वादित्यादौ कपिसंयोगत्वाद्यवच्छिन्नकपिसंयोगाभावस्य केवलान्वयिनः सजातीयस्य व्यापकीभूतव्याप्यवृत्त्यभावस्याप्रसिद्धावपि न क्षतिः व्याप्यवृत्तित्वविशिष्टतदभावं प्रत्येतद्वृक्षत्वाद्यभावस्य व्यापकत्वात्, साध्यतावच्छेदकसम्बन्धेन साध्यव्यापकताया विवक्षणीयतया संयोगेन द्रव्यस्याव्याप्यवृत्तितामते संयोगेन तत्साध्यके तादृशसम्बन्धेन व्यापकताप्रसिद्ध्यर्थं व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यस्यावश्यं निवेशनीयतया साध्यवह्निष्ठप्रतियोगिसमानाधिकरणाभावप्रतियोगितावच्छेदकस्यापि संयोगत्वादेः साध्यव्यापकतावच्छेदकत्वमक्षतमिति ध्येयम्। नानाव्यक्तिसाध्यके तत्तत्साध्यव्यक्त्यभावस्य नानाधिकरणकैकव्यक्तिसाध्यके यत्किञ्चिदधिकरणवृत्तित्वविशिष्टसाध्याभावस्य व्यापकीभूतोऽभावो न हेतुतावच्छेदकावच्छिन्नव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताक इति तादृशसाध्याभावव्यावर्त्तनाय साध्यतावच्छेदकावच्छिन्नव्यापकतापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वनिवेशनं, व्यापकता च साध्यतावच्छेदकसम्बन्धघटिता ग्राह्या तेन समवायेन द्रव्यत्वादिसाध्यकगुणादिहेतौ विषयतया साध्यव्यापकस्य ज्ञानादेः साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावं प्रति हेतुतावच्छेदकसम्बन्धावच्छिन्न-

हेत्वभावस्याव्यापकत्वेऽपि (१) न क्षतिः। साध्याभावश्च साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः, तेन संयोगादिना वह्न्यादिसाध्यक-धूमादिहेतौ समवायादिसम्बन्धावच्छिन्नवह्न्याद्यभावं प्रति संयोगादिना धूमादेरभावस्याव्यापकत्वेऽपि न क्षतिः। व्यभिचारिणि समानाधिकरणधर्म्मावच्छिन्नाभावव्यापकव्यधिकरणहेतुतावच्छेदकाद्यवच्छिन्नप्रतियोगिताकाभावमादायातिप्रसङ्गवारणाय सजातीयत्वोपादानम्। व्यतिरेकिसाध्यकस्थले यावत्साध्याभावसजातीयाप्रसिद्ध्या एकैकतत्सजातीयत्वनिवेशनं, साजात्यघटकसमानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वादिकमनुगतं पूर्व्वनिरुक्तभेदकूटरूपमेव ग्राह्यं अन्यथा यत्र भिन्न-भिन्नसम्बन्धेन साध्यहेतुभावस्तत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य यादृशप्रतियोगितानिरूपकत्वं तस्यैव तद्वत्तया सजातीयत्वेन तत्सजातीयाभावनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः (२) सजातीयस्यापि साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावस्य निवेशे हेतुव्यापकताया अपि तत्सम्बन्धघटिताया विवक्षणे उक्ताप्रसिद्धिनिबन्धनदोषासम्भवेऽपि सजातीयव्यापकीभूताभावस्येत्यादिवैयर्थ्यस्य दुर्व्वारत्वात्, (३) तत्परित्यागे च चरमलक्षण एव पर्य्यवसानात्। अथ सजातीया-

---

(१) हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुव्यापकाभावस्याव्यापकत्वेऽपीति पा०।

(२) सजातीयत्वेन तत्सजातीयहेतुतावच्छेदकसम्बन्धावच्छिन्नाभावाप्रसिद्धेरिति पा०।

(३) व्यापकीभूतस्येत्यादेर्वैयर्थ्यस्य दुर्व्वारत्वादिति पा०।

भावे हेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वस्यानिवेशेऽपि स्वमात्रनिष्ठयथाश्रुतसाजात्यनिवेशपक्षे नातिप्रसङ्गः आत्मत्वादिसाध्यके विषयतासम्बन्धेन हेतौ ज्ञानादौ समवायादिसम्बन्धावच्छिन्नज्ञानाद्यभावस्य साध्याभावव्यापकत्वेऽपि यथाश्रुतसाजात्याभावेनातिव्याप्त्यप्रसक्तेः, संयोगादिना वह्न्यादौ साध्ये समवायादिना हेतुं रूपविशेषं प्रति हेतुतावच्छेदकसमवायेन वह्न्याद्यभावप्रतियोगिनोऽव्यापकत्वेऽपि च न दोषः साध्यतावच्छेदकसम्बन्धेनैव हेतुव्यापकताया विवक्षणीयत्वात् इति चेत्तर्हि, सजातीयाभावे साध्याभावव्यापकत्वविशेषणस्य वैयर्थ्यमापद्येत स्वाव्यापकाभावस्य स्वसाजात्यविरहेणैव व्यावर्त्तनात्, व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभावसजातीयहेतुतावच्छेदकाद्यवच्छिन्नहेत्वाद्यभावमादायातिप्रसङ्गस्य वारणाय व्यापकीभूतस्येति, व्यभिचारिणोऽभावस्य च व्यभिचारनिरूपकाधिकरणसाधारणसाध्याभावाव्यापकत्वान्न दोषः। व्यापकत्वञ्च न तत्समानाधिकरणाभावाप्रतियोगित्वं, सर्व्वस्यैव तादृशद्वित्वाद्यवच्छिन्नाभावप्रतियोगितया असम्भवात्। न च तदधिकरणवृत्तित्वं हेतुतावच्छेदकसम्बन्धेनावश्यं वाच्यं तथाच वह्न्याद्यभाववति धूमाद्यभावस्य धूमाद्यनात्मकद्वित्वाद्यवच्छिन्नाभावस्य संयोगादिरूपहेतुतावच्छेदकसमसम्बन्धेनावृत्त्या न तमादाय दोषावसर इति वाच्यम्। एवमपि यत्र स्वरूपसम्बन्धेन हेतुता तत्र तादृशाभावप्रतियोगितया हेत्वभावस्य व्यापकत्वानुपपत्तेर्दुर्व्वारत्वात्। नापि तादृशाभावप्रतियोगितानवच्छेदकरूपवत्त्वम् तत्, अभावत्वाद्यात्मकता-

दृशरूपमादायाभावमात्रस्यैव व्यापकतया व्यापकत्वस्याव्यावर्त्तकतापत्तेः एवं वह्न्याद्यभाववति धूमावयवादौ समवायादिना वर्त्तमानं धूमादिरूपमभावमादाय तदभावस्य व्यापकताभङ्गभिया हेतुतावच्छेदकसम्बन्धेन सामानाधिकरण्यस्य निवेशनीयतया सत्तावान् जातेरित्यादौ सत्ताद्यभाववति सामान्यादौ हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्या अव्याप्तिश्चेति, तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वमेव साध्याभावव्यापकत्वं निर्धूमो वह्निशून्यत्वादित्यादौ हेत्वभावस्य वह्न्यादेश्च प्रत्येकं धूमादिमन्निष्ठभेदप्रतियोगिताच्छेदकत्वेऽपि अखण्डस्य निर्व्वह्नित्वप्रकारकप्रमाविषयत्वाद्यभावस्य तादृशव्यापकतासम्भवात् तत्प्रतियोगितावच्छेदकावच्छिन्नस्य हेतुव्यापकतयैव लक्षणसमन्वयः। तद्वन्निष्ठत्वं दैशिकविशेषणतया ग्राह्यं, अतो वह्न्याद्यभाववति धूमाद्यभाववद्भेदस्य कालिकसम्बन्धेन वृत्तावपि न क्षतिः। अभावाभावस्य प्रतियोगिरूपत्वेऽपि अभाववद्भेदोऽतिरिक्त एवातो धूमाद्यभाववत्ययोगोलकादौ दैशिकविशेषणतयावह्न्याद्यभाववद्भेदस्य वृत्तिरव्याहतैवेति न वह्न्याद्यभावस्य धूमाद्यभावव्यापकतापत्तिः। अथवा यदीयदैशिकविशेषणतासम्बन्धसामान्ये तत्तत्साध्याभाववद्यत्किञ्चिद्व्यक्त्यनुयोगिकत्वाभावस्तदन्यत्वमेव तत्तदभावव्यापकत्वम्। 'अभावस्येति भावभिन्नस्येत्यर्थः, तेन धूमवान् जलत्वाभावादित्यादौ (१) जलत्वादिनिरूपितदैशिकविशेषणताया अप्रसिद्ध्या तत्र निरुक्तभेदकूटात्मकव्यापकतासत्त्वेऽपि नातिव्याप्तिः। अभावरूपसद्धेतौ हे-

(१) ह्रदत्वाभावादित्यादाविति पा०।

तुमत्त्वप्रकारकप्रमाविषयत्वाद्यभावप्रतियोगितावच्छेदकावच्छिन्न-व्यापकतामादायैव लक्षणसमन्वयः । धूमवान् वह्नेरित्यादावयोगोलकादावप्युत्पत्तिकालावच्छेदेन वर्त्तमानस्य वह्न्याद्यभावस्य निरुक्तव्यापकतासत्त्वादतिव्याप्तिरतः 'व्याप्यवृत्तेरिति । यद्यपि तादृशाभावा अपि ह्रदादौ व्याप्यवृत्तयस्तथापि व्याप्यवृत्तित्वविशिष्टस्य व्यापकत्वं विवक्षणीयं, अनवच्छिन्नविशेषणतासम्बन्धेन व्यापकतानिवेशलाभायैव वा तदुक्तम् । अवच्छिन्नवृत्तिकान्यत्वरूपं व्याप्यवृत्तित्वन्तु न शक्यते निवेशयितुं संयोगेन सद्धेतौ हेतुतावच्छेदकसम्बन्धावच्छिन्नहेत्वभावस्यातथात्वात् 'प्रतियोगितावच्छेदकेत्यत्र प्रतियोगिता हेतुतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या, अन्यथा व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकहेत्वभावस्य साध्याभावव्यापकस्य समनियताभावैक्यमते व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावरूपतया समानाधिकरणधर्म्मावच्छिन्नसाध्याभावासजातीयत्वेन तमादायातिव्याप्तिविरहेऽपि आत्मत्वादिसाध्यके विषयतया हेतौ ज्ञानादौ साध्याभावव्यापकसमवायसम्बन्धावच्छिन्नज्ञानाद्यभावमादायातिव्याप्तिः (१) अभावे हेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वविशेषणं प्रवेश्य च नातिप्रसङ्गवारणसम्भवः, समनियताभावैक्ये समवायसम्बन्धावच्छिन्नज्ञानाद्यभावस्यापि स्वसमवायिविषयकत्वसम्बन्धेन ज्ञानादिविशिष्टज्ञानादेर्विषयतासम्बन्धावच्छिन्नाभावसमनियतत्वेन तादृशसम्बन्धावच्छिन्नप्रतियोगिताकत्वात्, धूमाद्यभावव्यापकमहानसीयवह्न्यभावप्रतियोगिनो वह्नि-

(१) अतिप्रसङ्गादिति पा० ।

त्वादिना वह्नित्वाद्यवच्छिन्नव्यापकत्वादतिप्रसङ्ग इति प्रतियोगिनो व्यापकतामुपेक्ष्य प्रतियोगितावच्छेदकस्य तदवच्छेदकत्वपर्य्यन्तानुधावनम्। इत्थं विशिष्टसत्त्वादित्यादौ साध्याभावव्यापकाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वादेर्हेतुतावच्छेदकोपलक्षितहेतुव्यापकतावच्छेदकत्वासम्भवात् यं प्रतीत्यनुक्त्वा यद्रूपावच्छिन्नं प्रतीत्युक्तं, व्यापकता च हेतुतावच्छेदकसम्बन्धेन ग्राह्या अतो महाकालभिन्नं कालत्वादित्यादौ साध्याभावव्यापकाभावप्रतियोगितावच्छेदकस्य साध्यतावच्छेदकादेः कालिकादिसम्बन्धेन हेतुव्यापकतायामवच्छेदकत्वेऽपि नातिव्याप्तिप्रसङ्गः। व्यापकतावच्छेदकताघटकसम्बन्धभेदनिवेशनादिकं स्वयमूह्यम् (१)। न च धूमवान् वह्निमत्त्वप्रकारकप्रमाविषयत्वादित्यादावतिव्याप्तिर्धूमाद्यभावव्यापकधूमाद्यभावस्य प्रतियोगितावच्छेदकजलादिवृत्तित्वविशिष्टधूमाभावाभावत्वादेर्हेतुतावच्छेदकस्वरूपसम्बन्धघटितहेतुव्यापकतायामवच्छेदकत्वादिति वाच्यम्। भाववृत्तिप्रतियोगितावच्छेदकस्य व्यापकतावच्छेदकताया विवक्षणीयत्वात्।

यथाश्रुतमिमलक्षणमुपन्यस्य दूषयति, 'साधनस्येति, 'तादृशेति ये ये साध्याभावाः प्रसिद्धास्तत्तत्सजातीय-तत्तद्व्यापकेत्यर्थः। तत्प्रतियोगितादये सम्बन्धविशेषावच्छिन्नत्वमनिवेश्य साध्यतावच्छेदकसम्बन्धघटितसाध्य-हेतुव्यापकत्वयोर्निवेशस्तु न सम्यक् तथा सति तादृशसाध्याभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्न-

(१) व्यापकताघटकसम्बन्धभेदनिवेशनादिकं स्वयमूह्यमिति पा०।

व्यापकतावच्छेदकं इत्येतावतैव सामञ्जस्ये सजातीयव्यापकाभावांशस्यानतिप्रयोजकत्वापत्तेः, उक्तरीत्यनुसरणे च संयोगेन वह्न्यादौ साध्ये रूपविशेषादेः समवायेन हेतुतायां संयोगेन साध्यव्यापकस्य वह्नेर्हेतुतावच्छेदकसमवायेन हेत्वव्यापकत्वेनाव्याप्तेर्वारणाय द्वितीयाभावनिवेशस्यावश्यकत्वात् (१)। 'तदवच्छेदकत्वं' तादृशप्रतियोगितावच्छेदकत्वं, आद्ये 'द्रव्यं सत्त्वादित्यादाविति, द्वितीये 'ज्ञेयं प्रमेयादित्यादाविति। ननु प्रमेयत्वादेः केवलान्वयितावच्छेदकत्वेऽपि वाच्यत्वादेरिव साध्याभावव्यापकव्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमक्षतमेवेत्याशङ्कां निरस्यति, 'प्रमेयत्वव्यधिकरणेति, प्रमेयत्वस्य केवलान्वयित्वादिति भावः। धूमाद्यभावं प्रति विषयितादिसम्बन्धेन वह्नित्वाद्यवच्छिन्नस्य योऽभावस्तस्य व्यापकत्वात्तमादाय आत्मत्वे साध्ये समवायेन द्रव्यत्वे हेतौ आत्मत्वाभावं प्रति विषयितासम्बन्धेन द्रव्यत्ववज्ज्ञानस्य यः समवायसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावस्तस्य व्यापकत्वात्तमादाय चातिप्रसङ्गस्य वारणाय प्रतियोगितावच्छेदकतायां हेतुतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्यावश्यन्निवेशनीयतया व्यधिकरणसमवायादिसम्बन्धेन प्रमेयत्वस्याभावप्रतियोगितायामसमानाधिकरणतयावच्छेदकत्वसम्भवेऽपि न निस्तार इत्यवधेयम्। अन्योन्याभाव एव व्यधिकरणधर्मावच्छिन्नावच्छेदकताकोन त्वत्यन्ताभाव इत्याशयेनेदं, अन्यथा घटत्वावच्छिन्नप्रमेयत्वा-

---

(१) तत्प्रतियोगिताद्वय इत्यादिः आवश्यकत्वादित्यन्तः पाठः बहुषु आदर्शपुस्तकेषु नास्ति।

वच्छिन्नप्रतियोगिताकात्यन्ताभावमादाय लक्षणगमनसम्भवात्(१)। इदमुपलक्षणं गुरुधर्म्मस्य प्रतियोगितानवच्छेदकत्वे कम्बुग्रीवादिमत्त्वाद्यवच्छिन्नहेतुकाव्याप्तिरपि द्रष्टव्या। एतेन व्यापकीभूताभावप्रतियोगितायां हेतुतावच्छेदकानवच्छिन्नत्व-व्यधिकरणधर्म्मानवच्छिन्नत्वोभयाभावविवक्षणे प्रमेयहेतुकस्थले वाच्यत्वत्वादिना घटाद्यभावप्रतियोगितायां तादृशोभयाभावसत्त्वेन लक्षणसमन्वयेऽपि न निस्तारः। उक्तस्थले हेतुतावच्छेदकावच्छिन्नत्वाप्रसिद्ध्या अप्रतीकारात्।

इति साजात्यघटितद्वितीयलक्षणव्याख्या।

तत्त्वचिन्तामणि-दीधितिः।

मिश्रोक्तलघुलक्षणम्।

यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तत्प्रयोगितावच्छेदकेन धर्म्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं वा तत्त्वमित्याहुः।

गादाधरी विवृतिः।

उक्तलक्षणे सजातीयादिपदपरित्यागेन लघुलक्षणमाह, 'यद्वे-

---

(१) लक्षणगमनसम्भवादित्यनन्तरं 'साध्याभावव्यापकतत्सजातीयाभावप्रतियोगितायां यद्रूपावच्छिन्नत्व-समानाधिकरणधर्म्मावच्छिन्नत्वोभयाभावस्तद्रूपवत्त्वं व्याप्तिरिति विवक्षणेनैव तद्दोषोद्धारेऽपि गुरुधर्म्मस्य प्रतियोगितानवच्छेदकत्वे कम्बुग्रीवादिमत्त्वाद्यवच्छिन्नहेतुकाव्याप्तिस्तदवच्छिन्नत्वाप्रसिद्धेरुक्तस्थले हेतुतावच्छेदकावच्छिन्नत्वाप्रसिद्धिरपि द्रष्टव्या' इति कस्यचिदादर्शपुस्तकस्य पाठः।

ति, व्यभिचारिणि व्यधिकरणधर्म्मावच्छिन्नाभावादिकमादायातिव्याप्तेर्व्वारणाय 'यावन्त' इति, वह्निमान् धूमादित्यादौ महानसीयवह्नित्वाद्यवच्छिन्नाभावप्रतियोगितावच्छेदकस्य धूमत्वाद्यवच्छिन्नव्यापकतानवच्छेदकतया अव्याप्तिरिति 'तादृशा' इति साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताका इत्यर्थः। अत्र व्याप्यवृत्तित्वविशेषणं प्रयोजनाभावादनुपादेयं(१)। साध्याभावसजातीयत्वादिविशेषणावच्छिन्नस्याप्यभावान्तरस्य प्रक्रान्तत्वात्तादृशपदे तत्परत्वभ्रमस्य झटितिनिरासाय (२) अभावा इत्येतन्मात्रमनभिधाय साध्याभावा इत्युक्तं, यावत्साध्याभावनिरूपिता न काचिदपि प्रतियोगितेति 'प्रत्येकपदं, अत्र च व्यभिचारिणं प्रत्यपि क्वचित् (३) किञ्चित्सम्बन्धेन साध्यतावच्छेदकावच्छिन्नस्य व्यापकतया अतिप्रसङ्गवारणाय प्रतियोगितावच्छेदकसम्बन्धेनैव व्यापकता निवेशनीया, इत्यञ्च समवायसम्बन्धावच्छिन्नवह्न्याद्यभावप्रतियोगितावच्छेदकसमवायादिसम्बन्धेन वह्नित्वाद्यवच्छिन्नस्य धूमाद्यव्यापकत्वादसम्भव इति प्रतियोगितावच्छेदकसम्बन्धेनैव साध्यव्यापकता विवक्षणीया तथाच केवलान्वयिसाध्यकस्थले व्यधिकरणसम्बन्धावच्छिन्नसाध्याभाव-

(१) तथाच साध्यव्यापकत्वं प्रतियोगिवैयधिकरण्याघटितमेव, तद्विशेषे प्रयोजनाभावादितिभावः।

(२) ननु तत्परत्वभ्रमे का क्षतिरिति चेत्, न, वाच्यं ज्ञेयत्वादित्यादौ साध्यव्यापकतावच्छेदकरूपावच्छिन्नाभावसजातीययावदभावान्तर्गतघटत्वेन घटाभावादीनां प्रतियोगितावच्छेदकस्य हेतोर्व्यापकतानवच्छेदकतया अव्याप्तेरिति।

(३) जन्यमात्राधिकरणकहेतुकस्थले।

मादाय निर्व्वाहो न भवतीति व्यधिकरणधर्म्मावच्छिन्नाभावस्योपयोगिता बोध्या धूमवान् वह्नेरित्यादौ धूमाद्यभावप्रतियोगितावच्छेदकजलादिवृत्तित्वविशिष्टधूमाद्यभावाभावत्वेन वह्न्यादिव्यापकत्वेऽपि नातिव्याप्तिः साध्यतावच्छेदकावच्छिन्ननिरूपितस्वावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकावच्छिन्ना यावत्यः प्रतियोगिताः प्रत्येकं तदवच्छेदकरूपेण तदवच्छेदकसम्बन्धेन यद्रूपावच्छिन्नं प्रति व्यापकत्वमित्येतादृशार्थस्यैव विवक्षणीयत्वात्। साध्यव्यापकतावच्छेदकं यद्यद्रूपं तेन व्यापकत्वविवक्षणे व्यधिकरणधर्म्मावच्छिन्नाभावोपयोगिता न घटते इति साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकत्वेन व्यापकतावच्छेदकनिवेशः, यथासन्निवेशे (१) न वैयर्थ्यं, प्रतियोगितायाः स्वरूपसम्बन्धरूपत्वे वह्नित्वाद्यवच्छिन्नप्रतियोगिताया वह्न्यादिव्यक्तिभेदेन भिन्नाया धूमत्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वं न सम्भवतीति व्यापकतावच्छेदकावच्छिन्नप्रतियोगिताया व्यापकतावच्छेदकत्वं न निवेशितम्।

इति मिश्रोक्तसाजात्याघटितलघुलक्षणव्याख्या।

तत्त्वचिन्तामणि-दीधितिः।

कूटाघटितलक्षणम्।

परे तु वृत्तिमद्वृत्तयो यावन्तः साध्याभाववद्वृत्ति-

---

(१) ननु व्यधिकरणधर्म्मावच्छिन्नाभावसंग्राहकविशेषणस्य व्यर्थत्वात् कथमेवमित्यत आह, यथासन्निवेश इति।

त्वाभावास्तद्रूपवत्त्वं व्याप्तिः येन सम्बन्धेन हेतुता तेनैव वृत्तिमत्त्वमपि बोध्यं तेन व्यधिकरणधर्म्मावच्छिन्नवह्न्यभाववति संयोगेन या वृत्तिस्तदभावस्य जात्यादौ वर्त्तमानस्य धूमादावसत्त्वेऽपि न क्षतिः। साध्याभावश्च पूर्ब्ववद्बोध्यः, तद्वद्वृत्तित्वाभावोपि स्वव्यापक-तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकः तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तेन समानाधिकरणेन साध्याभाववद्वृत्तित्ववृत्तिना वा धर्म्मेणानवच्छिन्नप्रतियोगिताकोबोध्यः तेनालोकाद्यवृत्तित्वेन रूपेण योवह्निसामान्याभाववद्वृत्तित्वस्य यश्चेन्धनत्वाद्यवच्छिन्नवह्न्यभावाधिकरणीभूतमहानसवृत्तित्वादेरभावस्तस्य धूमादौ स्वनिष्ठसाध्याभाववद्वृत्तित्वविरहस्य च हेत्वन्तरवृत्तेः स्वस्मिन्नसत्त्वेऽपि न क्षतिरित्याहुः।

गादाधरी विवृतिः।

कूटघटितलक्षणे व्यभिचारिणि साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताको न निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावः, अपि तु जगद्वृत्तित्वसामान्याभाव एव, स च व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताक एव वृत्तिमद्वृत्तिरित्यतिव्याप्तिवारणाय कूटपदमुपात्तं तादृशातिव्याप्तिश्च समानाधिकरणधर्म्मावच्छिन्नाभावसाधारणरूपेण साध्याभावस्य व्याप्यतावच्छेदककोटौ प्रवेशन-

एव प्रसज्यते न तु विशिष्टसाध्याभावनिवेशे, तथा सति निर्धूमवृत्तित्वत्वावच्छिन्नाभावस्यापि लक्षणघटकतानिर्व्वाहादिति कूटपदमनुपादाय विशिष्य साध्याभावं निवेश्यैव लक्षणमुचितं तदुपादाने बहूनां दोषाणां वक्ष्यमाणत्वादिति कूटघटितलक्षणवादिनां मतमाक्षिप्य कूटाघटितं तल्लक्षणं दर्शयति, 'परे त्वित्यादिना, साध्याभाववद्वृत्तित्वस्य व्यधिकरणधर्म्मावच्छिन्नाभावमादाय व्यभिचारिमात्रेऽतिव्याप्तिरतो 'यावन्त इति, तथा सति समानाधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य समानाधिकरणधर्म्मावच्छिन्नाभावस्य यावत्तादृशाभावान्तर्गतस्य व्यभिचारिण्यसत्त्वान्नातिव्याप्तिः। वृत्तिमद्वृत्तित्वानुपादाने समानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकस्य व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववत्संयुक्तत्वाद्यभावस्यासंयुक्तादौ प्रसिद्धस्य हेतावसत्त्वात् संयोगादिसम्बन्धेन हेतावव्याप्तिः न त्वसम्भवः यादृशसम्बन्धस्य प्रतियोगित्वं वस्तुमात्र एव तादात्म्य-विषयतादिरूपतादृशसम्बन्धेन हेतावेव परं लक्षणसमन्वयो भवति तादृशसम्बन्धेन जगत्सम्बद्धत्वस्य समानाधिकरणधर्म्मावच्छिन्नाभावाप्रसिद्धेरिति तदुपादानम्। ननु वृत्तिमद्वृत्तित्वोपादानेऽपि जगत्संयुक्तत्वत्वाद्यवच्छिन्नाभावस्य जात्यादिरूपवृत्तिमति वर्त्तमानस्य वारणासम्भवाद्वह्निमान् धूमादित्यादावव्याप्तिर्दुर्व्वारैव निर्धूमसंयुक्तत्वाद्यभावस्य निर्धूमवृत्तित्वत्वाव्यापकप्रतियोगिताकतया वृत्तिमन्मात्रस्यैव निर्धूमकालादिवृत्तित्वेन च निर्धूमवृत्तित्वसामान्याभावस्य व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तित्वेन धूमवान् वह्ने-

रित्यादावतिव्याप्तेर्वारणाय हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वस्यैव निवेशनीयतया (१) यत्र संयोगादिना हेतुत्वं तत्र जगत्संयुक्तत्वत्वाद्यवच्छिन्नाभावस्यापि हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वेन लक्षणघटकत्वात्-वृत्तिमत्पदस्य यथाश्रुतार्थकत्वे कालिकसम्बन्धेन गगनादेरवृत्तित्वमते तेन सम्बन्धेन यत्र हेतुता तत्रैव परमव्याप्तिवारकता तेन सम्बन्धेन जगद्वृत्तित्वाभावस्यावृत्तिमात्रे प्रसिद्धत्वादित्यत आह, 'हेतुतावच्छेदकसम्बन्धेनेति, 'न चतिरिति नाव्याप्तिरित्यर्थः, न तु नासम्भवः तादात्म्य-कालिकादिसम्बन्धेन हेतौ लक्षणसमन्वयसम्भवात् (२)। ननु नानाव्यक्तिसाध्यके तत्तत्साध्यव्यक्त्यभाववद्वृत्तित्वाभावस्य हेतावसत्त्वादव्याप्तिः कूटघटितलक्षण इवात्रापि साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशेऽपि तार्णतार्णदहनोभयत्वावच्छिन्नाभावमादाय वह्न्यादिसाध्यके गुणादिवृत्तित्वविशिष्टसत्ताद्यभावमादाय सत्तादिसाध्यकेऽव्याप्तिर्दुर्व्वारैव एवमव्याप्यवृत्तिकपिसंयोगादिसाध्यके हेत्वधिकरणस्यैव जगत एव कपिसंयोगत्वाद्यवच्छिन्नाभाववत्तया तद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वेनाव्याप्तिविरहेऽपि तादृशकपिसंयोगाभावादिसाध्यक-द्रव्यत्वादिहेतौ कपिसंयोगादिरूपसाध्याभाववद्वृत्तित्वाभावासत्त्वादव्याप्तिरित्यत आह,

---

(१) विवक्षणीयतयेति पा०।

(२) तादात्म्यादिसम्बन्धेन च हेतौ लक्षणगमनसम्भवेनासम्भवाप्रसक्तेरिति पा०।

'साध्याभावश्चेति, 'पूर्व्ववदिति मिश्रलक्षणे यथा साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताको व्याप्यवृत्तिरभावो निवेश्यते तथात्रापि निवेशनीय इत्यर्थः, तत्तद्वह्नित्वकथितोभयत्वाद्यवच्छिन्नाभावानां प्रथमविशेषणेन कपिसंयोगादिरूपाभावानाञ्च द्वितीयविशेषणेन व्यावृत्तिः। ननु साध्याभाववद्वृत्तित्वप्रतियोगिताकाभावमात्रनिवेशे प्रकृतहेतुसाधारणस्य व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वविशेषस्य समानाधिकरणधर्म्मावच्छिन्नाभावोऽपि वृत्तिमद्वृत्तिः सम्भवतीति यावत्तादृशाभावान्तर्गततद्वत्त्वस्य हेतावभावादसम्भवः, एवं समानाधिकरणधर्म्मावच्छिन्नाभाववद्वृत्तित्वस्य प्रकृतहेतुवृत्तितावच्छेदकीभूतकिञ्चिद्धर्म्मावच्छिन्नस्याभावोऽपि यावत्तादृशाभावान्तर्गत इति तद्वत्त्वविरहादपि व्यतिरेकिसाध्यक–हेतूनामव्यभिचारित्वानुपपत्तिः तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावश्च विवक्षितुमशक्यः केवलान्वयिनि साध्याभाववद्वृत्तित्वत्वेन घटाद्यभावस्य तादृशगुरुधर्म्मस्य प्रतियोगितावच्छेदकत्वमते प्रसिद्धावपि तस्यातथात्वमते व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्य स्वघटककेवलवृत्तित्वत्वसमनियततया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेर्दुर्व्वारत्वात्, तत्तदभाववद्वृत्तित्वत्वघटकधर्म्मावच्छिन्नाभावनिवेशे च वह्नित्वाद्यवच्छिन्नवह्न्याद्यभावव्यक्तेस्तत्तदभावत्वावच्छिन्नाभावस्यापि तादृशतया तस्य च धूमादावसत्त्वादव्याप्तिः साध्याभाववद्वृत्तित्ववृत्तितादृशधर्म्मावच्छिन्नाभावनिवेशनेऽपि घटवृत्तित्वत्वाद्यवच्छिन्नसाध्यके-

तादात्म्येन घटत्वव्यापकादिहेतौ तादृशसाध्याभाववद्घटादिवृत्तित्वनिष्ठतादृशसाध्याभाववत्त्वरूपतथाविधधर्म्मावच्छिन्नाभावस्य (१) घटादिमात्रवृत्तेर्हेतौ (२) असत्त्वादव्याप्तिर्दुर्व्वारैव (३)। साध्याभावादिव्यावृत्तघटकतानिवेशने च प्रयासगौरवमिति तत्तत्साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकाभावं विवक्षति, 'तद्वदिति, 'स्वं' प्रतियोगिता, अत्र साध्याभावस्य साध्याभावत्वेन सामान्यतो निवेशे व्यभिचारिणि निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावप्रतियोगिताया व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववत्साध्याधिकरणवृत्तित्वसाधारणसाध्याभाववद्वृत्तित्वत्वाव्यापकत्वेन तादृशाभावस्य लक्षणाघटकतया वृत्तित्वसामान्याभावस्य तथाविधप्रतियोगिताकस्य च व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तितया अतिव्याप्तिरिति तत्तद्व्यक्तित्वेनाभावस्य व्याप्यतावच्छेदककोटिनिवेशलाभाय 'तत्तदिति। यद्यपि यत्किञ्चित्साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकवृत्तिमद्वृत्तियावदभाववत्त्वं व्यभिचारिसाधारणं, यावन्तः साध्याभावाः प्रत्येकं तत्तदधिकरणवृत्तित्वत्वसमनियतैकप्रतियोगिताया नानाविपक्षकसाध्येऽप्रसिद्धिस्तत्तद्विपक्षावृत्तित्वावच्छिन्नाभाववत्तत्तद्विपक्षवृत्तित्वत्व--

(१) तत्तदभाववद्वृत्तित्वत्वघटकधर्म्मेत्यर्थः।

(२) घटातिरिक्ते तादृशसाध्याभावावच्छिन्नघटभेदादेः सत्त्वादितिभावः।

(३) अत्र 'द्रव्यसमवेतं गुणत्वादित्यादौ द्रव्यसमवेतत्वाभाववत्समवेतत्वघटकीभूतेन द्रव्यसमवेतत्वाभाववत्समवेतत्ववृत्तिना द्रव्यसमवेतत्वाभावेनावच्छिन्नप्रतियोगिताकाभावस्य द्रव्ये प्रसिद्धस्य हेतावसत्त्वाद्व्याप्तिर्दुर्व्वारैवेत्यधिकः पाठः कस्मिंश्चिदादर्शपुस्तके वर्त्तते।

व्याप्यप्रतियोगित्वाप्रसिद्धेः, तथापि यावतामभावानां प्रत्येका-धिकरणवृत्तित्वत्वसमनैयत्यस्य प्रत्येकप्रतियोगितान्वयेन एत-दभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताको यो योऽभावस्तदभाव-वद्वृत्तित्वत्वसमनियतप्रतियोगिताकश्च यो योऽभावस्तद्वत्त्वमित्येवं रीत्या निवेशान्नानुपपत्तिः। एतल्लक्षणे साध्याभावसमुदायो न समु-दायत्वेन प्रविष्टः अपि तु प्रातिस्विकरूपेणेति कूटघटिताद्विशेषः। अथात्र स्वपदं न तत्तदभावीयप्रतियोगितात्वरूपेण प्रतियोगि-तापरं साध्याभाववद्वृत्तित्वातिरिक्तेऽपि तत्तदभावीयप्रतियोगित्वा-न्तरसत्त्वादिति(१) तत्तत्प्रतियोगिताव्यक्तिपरं तद्वाच्यं, तथाच यत्कि-ञ्चित्प्रतियोगितानिरूपकाशेषाभावस्यातिव्यापकतया (२) यावत्य-स्तादृशप्रतियोगिताः (३) प्रत्येकं तन्निरूपकाभाववत्त्वं निवेशनीयं, तथाच समानाधिकरणधर्म्मावच्छिन्नजगद्वृत्तित्वसामान्याभावप्रति-योगितानिरूपकवृत्तिमद्वृत्त्यभावाप्रसिद्ध्या अव्याप्तिरिति वृत्ति-मद्वृत्त्यभावीयत्वेन यावत्प्रतियोगिता निवेशनीया तथाच तन्निरूप-काभावे वृत्तिमद्वृत्तित्वनिवेशनं व्यर्थं यावत्त्वविशेषणमपि तथेति चेन्नोपादीयन्त एव तत्र तत्तद्विशेषणं, वृत्तिमद्वृत्त्यभावीययाव-त्प्रतियोगिताविशेष्यीभूताभावे वृत्तिमद्वृत्तित्व-यावत्त्वाभिधानात्। अत्र च गुरुधर्म्मस्याभावप्रतियोगितानवच्छेदकत्वे स्वव्यापकतत्तद-भाववद्वृत्तित्वत्ववन्निष्ठभेदप्रतियोगितावच्छेदकत्वस्याव्यावर्त्तकव्याप-

---

(१) किञ्चिद्विशिष्टस्वाभावादिनिष्ठप्रतियोगित्वान्तरसत्त्वादित्यर्थः।

(३) अतिव्याप्तिसम्पादकतया।

(२) साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिता इत्यर्थः।

कतान्तघटितत्वेनाभावप्रतियोगितानवच्छेदकतया तदवच्छिन्नान्योन्याभावरूपव्यापकत्वपुरस्कारेण न प्रतियोगितानिवेशः सम्भवतीति तादृशावच्छेदकभेदकूटात्मकव्यापकत्वपुरस्कारेणैव तन्निवेशः। न च स्वव्यापकतत्तदभाववद्वृत्तित्वत्वकत्व-तत्तदभाववद्वृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वावच्छिन्नैकभेदोभयरूपेण प्रतियोगितानिवेशसम्भवादवच्छेदकभेदकूटनिवेशनमफलमिति वाच्यम्। घटभेदादिसाध्यकस्थले तदभावव्यक्तित्वेन घटत्वादिघटितस्य तदभाववद्वृत्तित्वत्ववन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वस्य स्वरूपतो घटत्वादिघटितं घटवृत्तित्वत्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वमपेक्ष्य गुरुशरीरतया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नैकभेदनिवेशासम्भवात्। अत्र कल्पे व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकस्य पर्व्वतवृत्तित्व-पर्व्वतान्यवृत्तित्वोभयत्वाद्यवच्छिन्नाभावस्य पर्व्वताद्यवृत्तिवृत्तिमद्वृत्तेर्धूमादावभावादेकमात्रवृत्तिहेतावपि तादृशप्रतियोगिताकस्य एतत्क्षणावच्छिन्नवृत्तित्वैतदन्यक्षणावच्छिन्नवृत्तित्वोभयत्वावच्छिन्नाभावस्य एतत्क्षणावच्छिन्नावृत्तौ वृत्तिमति वर्त्तमानस्याभावादसम्भवः तादृशाभावव्यावर्त्तनाय व्यासज्यवृत्तिधर्म्मानवच्छिन्नप्रतियोगिताकत्वनिवेशे च गौरवं पर्व्वतवृत्तित्वत्वादिना जगद्वृत्तित्वसामान्याभावस्य व्यावृत्त्यसम्भवश्चेत्यतः कल्पान्तरमनुसरति, 'तत्तत्साध्याभावेति, अतिरिक्तान्तानिवेशे व्यधिकरणधर्म्मावच्छिन्नाभावमात्रस्य संग्रहाद्व्यभिचारिमात्रेऽतिव्याप्तिरिति तन्निवेशनम्। यद्यपि यथाश्रुते-

नानेन महानसवृत्तित्वत्वादिना व्यधिकरणधर्म्मावच्छिन्नाभाववद्वृत्तित्वाभाववारणं न सम्भवति महानसादिनिरूपितत्वविशिष्टवृत्तित्वत्वस्य साध्याभाववन्निरूपितत्वविशिष्टवृत्तित्वत्वरूपसाध्याभाववद्वृत्तित्वत्वान्यत्वविरहात्, तथापि साध्याभाववद्वृत्तित्वत्वानिरूपितसमानाधिकरणधर्म्मनिरूपितावच्छेद्यत्वशून्यत्वस्यानवच्छिन्नान्तेन विवक्षणान्न दोषः महानसवृत्तित्वत्वादिनिरूपितावच्छेद्यत्वस्य साध्याभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थानिरूपितत्वात्। न चैवमपि साध्याभाववन्महानसवृत्तित्वत्वाद्यवच्छिन्नाभाववारणमशक्यं तादृशनिरूपितावच्छेद्यतायां तद्घटकसाध्याभाववद्वृत्तित्वत्वनिरूपितत्वस्याधिकन्त्वित्यादिन्यायेनाव्याहतत्वादिति वाच्यम्। गुरुधर्म्मस्याभावप्रपियोगितानवच्छेदकतया महानसादिवृत्तित्वत्वसमनियतोपदर्शितगुरुधर्म्मस्याभावप्रतियोगितानवच्छेदकत्वात्। अथ गुरुधर्म्मस्याभावप्रतियोगितानवच्छेदकत्वे साध्याभावपदस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नभावपरतया धूमवान् वह्नेरित्यादावतिव्याप्तिः धूमत्वाद्यवच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वत्वस्य स्वसमनियतधूमत्वाद्यवच्छिन्नाभाववद्वृत्वत्वापेक्षया गुरुत्वेनाभावप्रतियोगितावच्छेदकत्वविरहेण तदवच्छिन्नाभावाप्रसिद्धेः धूमत्वाद्यवच्छिन्नाभाववद्वृत्तित्वत्वाद्यवच्छिन्नप्रतियोगितायाः धूमत्वाद्यवच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थानवच्छिन्नतया तन्निरूपकाभावस्य निरुक्ताभावविशेषणानाक्रान्तत्वेन व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकस्य साध्याभाववद्वृत्तित्वाभावस्यैव

लक्षणघटकत्वात् । यदि च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्य तेन रूपेण न निवेशः अपि तु तत्तदभावत्वेनैव एतदेव सूचयितुं तत्तत्पदमुपात्तम् एवञ्च तत्तद्व्यक्तित्वेन धूमाद्यभावघटिततत्तदभाववद्वृत्तित्वत्वावच्छिन्नाभावस्य लक्षणघटकतया न धूमादिसाध्यकेऽतिव्याप्तिरित्युच्यते तथापि एतद्व्यक्तिभिन्नं घटभिन्नं वा प्रमेयत्वादित्यादावतिव्याप्तिस्तत्तद्व्यक्तित्वरूपेण घटभेदाभावघटिततद्व्यक्तिमद्वृत्तित्वत्वापेक्षया लघोस्तत्समनियतस्य किञ्चिद्विशेषणानवच्छिन्नघटत्वघटितस्य घटवृत्तित्वत्वस्यैवाभावप्रतियोगितावच्छेदकतया तद्व्यक्तिमद्वृत्तित्वत्वावच्छिन्नाभावाप्रसिद्धेः घटवृत्तित्वत्वावच्छिन्नप्रतियोगितायाश्च साध्याभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थानवच्छिन्नतया तन्निरूपकाभावस्य लक्षणघटकत्वासम्भवाद्व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावस्यैव तथात्वात् । यदि चाभावधर्म्मो विशेषणविधया न निवेश्यते अपि तु अभावप्रभृतिरेव, अभावे तु साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वमुपलक्षणविधया निवेश्यते एतल्लाभायैव तत्तत्पदोपादानमपि न तु तत्तद्व्यक्तित्वेनाभावविशेषलाभार्थं, उपलक्षणीभूतप्रतियोगिताविशेषेणैवाभावान्तरव्यावृत्तिसम्भवे तत्तद्व्यक्तित्वस्योपलक्षणविधया निवेशे प्रयोजनविरहात्, एवञ्च घटवृत्तित्वत्वावच्छिन्नाभावोऽप्युक्तस्थले लक्षणघटकः घटभेदाभावस्य घटत्वस्य तत्प्रतियोगितावच्छेदकघटकत्वात्प्रतियोगिताविशेषोपलक्षिताभाववद्वृत्तित्वत्वपर्य्याप्तनिरूपकताकान्यत्वपर्य्यन्तानिवेशात्

धूमादिसाध्यकस्थले निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावस्य प्रतियोगितावच्छेदकशरीरे अभावविशेषणस्याधिकस्य निवेशनेऽपि न क्षतिः। न चाभावप्रतियोगिकोटौ उपलक्षणतया भानस्यानुभवविरुद्धत्वात् विशिष्टनिरूपितत्वाभावरूपस्य निरूपितत्वसम्बन्धावच्छिन्नविशिष्टाभावरूपस्य वा विशिष्टानिरूपितत्वस्य प्रतियोगिकोटौ प्रतियोगिताविशेषस्य कथमुपलक्षणविधया निवेश इति वाच्यम्। अभावप्रतियोगिप्रकारशरीरे प्रतियोगितावच्छेदककोट्यप्रविष्टस्य न भानमित्येव हि अभावप्रतियोगिनि तदवच्छेदके वा उपलक्षणविधया न भानमित्यस्यार्थः, प्रकृते निरुक्तप्रतियोगिताकत्वस्य निरूप्यत्वप्रतियोगिविशिष्टाघटकत्वादेव निरूप्यत्वप्रतियोगिन्युपलक्षणत्वं (१) न तु निरूप्यत्वाभावप्रतियोगितातिच्छेदकघटकतया अप्रवेशात् तदभावप्रतियोगितावच्छेदकप्रविष्टाभावस्याभावान्तरव्यावृत्तये तादृशप्रतियोगिताकत्वस्य प्रतियोगितावच्छेदकघटकतयैव निवेशात् यथा द्रव्यत्वस्य द्रव्यत्वोपलक्षितनिरूपितविषयित्वाभावप्रतियोगिनि नोपलक्षणत्वं किन्तु विषयितानिरूपकांश एवेति (२) निर्धूमवृत्तित्वत्वस्य धूमव्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तितात्वसमनियतत्वेऽपि व्यापकतावच्छेदकधर्म्मान्तरावच्छिन्नाभावघटितविशिष्टनिरूप्यत्वे धूम-

---

(१) प्रकृते निरुक्तप्रतियोगिताकत्वस्यावच्छेद्यत्वनिरूपकतावच्छेदकतया अप्रवेशादेव उपलक्षणत्वमिति पा०।

(२) तादृशप्रतियोगिताकत्वस्य उपलक्षणतयैव प्रतियोगितावच्छेदकघटकतया निवेशादिति पा०।

त्वावच्छिन्नधूमाभावघटितविशिष्टनिरूपितत्वरूपताविरहात् तत्त-द्विशिष्टनिरूपितत्वयोर्न समनैयत्यम् इति न व्यापकतावच्छेद-करूपावच्छिन्नप्रतियोगिताकत्वघटितधर्म्मावच्छिन्नप्रतियोगिताक-निरूप्यत्वाभावाप्रसिद्धिः प्रतियोगितासंसर्गकज्ञान एव तादृश-भानस्य तथात्वात् जात्यवच्छिन्नप्रतियोगिताकोऽभाव इत्या-कारस्य स्वरूपतो घटत्वाद्यवच्छिन्नप्रतियोगिताकाभावभानस्य सर्व्वसम्मतत्वात् प्रकृते च साध्यतावच्छेदकावच्छिन्नव्यापकताव-च्छेदकरूपावच्छिन्नप्रतियोगिताको योऽभावस्तद्वद्वृत्तित्वत्वनिरू-पितत्वप्रतियोगिताकाभाववतः समानाधिकरणधर्म्मावच्छेद्यत्वस्य योऽभावस्तद्वत्प्रतियोगिताका यावन्तोऽभावास्तद्वान् हेतुरित्या-कारकव्याप्तिग्रहे प्रतियोगितायाः विशेषणत्वेनानुपपत्त्यभावात् अतएव च व्यापकतावच्छेदकादेरुपलक्षणविधया भानोपपत्तिः । न च तादृशनिरूपितत्वप्रतियोगिकस्य तत्त्वावच्छिन्नप्रतियोगिता-काभावस्य वा अभावस्य निवेशे निर्धूमवृत्तित्वत्वावच्छिन्नाभावे प्रतियोगितानिष्ठावच्छेद्यतायामपि किञ्चिद्विशिष्टतादृशनिरू-पितत्वत्वावच्छिन्नाभावसत्त्वात्तादृशाभावासंग्रह इति वाच्यम् । तत्तदभाववद्वृत्तित्वत्वनिरूपितत्वत्वपर्य्याप्तप्रतियोगितावच्छेदकता-काभावस्यैव निवेशनीयत्वात् एवञ्च तत्तद्व्यक्तित्वेनाभावनिवेश-ध्रौव्येन तत्तत्पदोपादानमपि साधु सङ्गच्छते इत्युच्यते (१) तदापि घटत्व-भेदादिसाध्यके व्यभिचारिण्यतिव्याप्तिवारणमशक्यं निर्विशे-

(१) प्रतियोगितावच्छेदकघटकतयैव निवेशादित्यनन्तरं निर्धूमवृत्तित्वत्वस्ये-त्यादिः साधु सङ्गच्छते इत्यन्तः पाठः बहुषु आदर्शपुस्तकेषु नास्ति ।

षणकघटत्वादिवृत्तित्वत्वस्यैव तत्र घटत्वादिवृत्तित्वाभावप्रतियोगितावच्छेदकतया घटत्वत्वादिरूपसाध्याभावस्य प्रतियोगितावच्छेदकशरीरे अनिवेशेन व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात्। न च जातेः समवायेन स्वरूपतोऽवच्छेदकत्वं न तु सम्बन्धान्तरेण अतएव गोत्वादिजातिनिष्ठव्याप्तौ पदविशेषप्रवृत्तिनिमित्तगवेवेतरासमवेतत्वादेरवच्छेदकत्वं स्वीकुर्व्वन्ति न तु तादात्म्यसम्बन्धेन लघोरपि गोत्वादिजातेरिति निर्विशेषणकघटत्वादिघटितस्याभावप्रतियोगितावच्छेदकत्वं न सम्भवतीति वाच्यम्। तादृशनियमे मानाभावात्। यदि चाभावांशस्याप्युपलक्षणत्वं स्वीक्रियते तदा महानसवृत्तित्वत्वावच्छिन्नाभाववारणमशक्यमेव। यदि च साध्याभावातिरिक्तविशेषणाविशेषिताधिकरणवृत्तित्वत्वाद्यवच्छेद्यताभिन्नसमानाधिकरणधर्म्मावच्छेद्यत्वाभावं निवेश्याविशेषितघटत्वादिवृत्तित्वाभावः संगृह्यते तदा तादृशाभावमादाय जातिसाधारणसद्धेतावव्याप्तिर्वज्रलेपायते। एवं साध्याभाववद्वृत्तित्वत्वशरीरेऽभावादेर्विशेषणविधया प्रवेशे वृत्तिमद्वृत्तिपदमनर्थकम् आपद्येत, व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्य यः समानाधिकरणधर्म्मावच्छिन्नाभावस्तत्प्रतियोगिताया लाघवेन वृत्तित्वत्वेनैवावच्छिन्नतया तन्निष्ठावच्छेद्यताया अभावघटितविशिष्टपदार्थानिरूपितत्वात्। अत्र वदन्ति, गुरुधर्म्मस्याभावप्रतियोगितावच्छेदकत्वमतेनेदमभिहितं, व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववन्महानसवृत्तित्वत्वाद्यवच्छिन्नाभाववारणाय च साध्याभाववद्वृत्तित्वत्वपर्य्याप्तावच्छेदकताभिन्नसमानाधिकरणधर्म्मनिष्ठावच्छेदकत्वानिरूपकत्वमेव प्रतियोगि-

तायां विशेषणं देयम्। न चैवं घटत्वादिना साध्याभाववद्वृत्तित्वाभावसंग्रहफलकं समानाधिकरणपदोपादानं निषेधद्वयनिवेशनञ्च विफलं तादृशाभावस्यासंग्रहेऽपि केवलान्वयिसाध्यके साध्याभाववद्वृत्तित्वत्वेन घटाद्यभावमादाय लक्षणसमन्वयसम्भवादिति वाच्यम्। विषयतादिसम्बन्धेन यत्र हेतुता तत्र हेतुतावच्छेदकसम्बन्धेन साध्याभाववति वृत्तेः साध्याभाववद्विषयतादिरूपायाः विषयादिस्वरूपत्वेन साध्याभाववद्विषयतात्वादिरूपसाध्याभाववद्वृत्तित्वत्वस्य केवलान्वयितया तदवच्छिन्नाभावाप्रसिद्धेस्तादृशाभावघटितलक्षणानुपपत्तेः। न च साध्याभाववद्विषयतात्वादिकं येन सम्बन्धेनावृत्ति तेन सम्बन्धेन तदवच्छिन्नाभावमादाय लक्षणसमन्वयः सम्भवतीति वाच्यम्। कालिकसम्बन्धेन साध्याभाववद्वृत्तित्वत्वावच्छिन्नस्य योऽभावस्तस्य ध्वंसाद्यधिकरणहेत्वव्यापकतया स्वरूपसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकाभावस्यावश्यनिवेशनीयतया व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगितावच्छेदताकाभावस्य लक्षणघटकत्वासम्भवात् विषयताया जात्यादिरूपत्वेऽपि विषयतात्वविशिष्टस्य न समवायादिना वृत्तिः तादृशस्य स्वस्मिन्नेव वृत्तेर्जात्यादौ च समवायाभावात् किन्तु स्वरूपसम्बन्धेनैव एवञ्च समवायादिसम्बन्धावच्छिन्नप्रतियोगिताक एव विषयतात्वाद्यवच्छिन्नाभावो लक्षणघटको भविष्यतीत्यपि न, काल-ज्ञानादिरूपहेतौ कालिक-विषयितादिसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावस्यासत्त्वेन स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्यैव निवेशनीयत्वात्। न चैवं साध्याभाव-

वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्म्मानवच्छिन्नाभावस्यापि तत्रा-प्रसिद्धिर्घटत्वादेः साध्याभाववद्विषयतादिनिष्ठप्रतियोगितावैय-धिकरण्यासम्भवादिति वाच्यम्। घटत्वादिना पटाद्यभावस्यैव तथात्वात्। अथैवमपि सामानाधिकरण्यमुपेत्य साध्याभाव-वद्वृत्तित्वनिष्ठत्वेन धर्म्मविशेषणकल्पे घटत्वादेर्घटादिस्वरूपसाध्या-भाववद्विषयतानिष्ठत्वेन गगनादेरपि स्वनिष्ठविषयतात्मकत्वेन साध्याभाववद्विषयतानिष्ठतया साध्याभाववद्वृत्तित्वातिरिक्तताहृ-शधर्म्मानवच्छिन्नाभावाप्रसिद्ध्या उक्तस्थलेऽव्याप्तिर्दुर्व्वारैव येन रूपेण यत् साध्याभाववद्वृत्तित्ववृत्ति तद्रूपविशिष्टतदनवच्छिन्नप्रति-योगिताकाभावविवक्षणेन गगनत्वविशिष्टगगनाद्यवच्छिन्नाभावस्य लक्षणघटकतानिर्व्वाहेऽपि हेतुनिष्ठव्यधिकरणधर्म्मावच्छिन्नसाध्या-भाववद्वृत्तित्वव्यक्तेः किञ्चिदविशेषिततत्तद्व्यक्तित्वावच्छिन्नप्रति-योगिताकाभावस्य तथाविधस्य हेतावसत्त्वादसम्भवप्रसङ्ग इति चेन्न, येन सम्बन्धेन यद् वर्त्तते तेन सम्बन्धेन तदनवच्छिन्नत्वस्य विवक्षणीयतया संयोगादिसम्बन्धेन घटत्वाद्यवच्छेदकताकाभाव-मादाय उक्तस्थले लक्षणसमन्वयसम्भवात्, उक्तार्थलाभायैव च साध्याभाववद्वृत्तित्ववृत्तित्वोपादानं न तु तदपि लक्षणघटकं प्रयोजनाभावात्सर्व्वत्र दर्शिताभावमादायैव लक्षणसमन्वयसम्भवेन समवायादिसम्बन्धेन घटत्वाद्यवच्छिन्नसाध्याभाववत्संयुक्तत्वाद्य-भावस्य लक्षणाघटकत्वेऽपि क्षतिविरहात्। एतेन धूमत्वत्वाद्यव-च्छिन्नधूमत्वाद्यभावस्य धूमत्वप्रकारकप्रमाविषयत्वाद्यभावस्य च साध्याभाववद्वृत्तित्ववृत्तिधर्म्मानवच्छिन्नप्रतियोगिताकस्य वारणाय

साध्याभाववद्वृत्तित्वनिष्ठप्रतियोगिताकत्वविशेषणमप्यनादेयम्। अतएव च स्वसमानाधिकरणत्वस्य प्रतियोगितावच्छेदकविशेषणत्वकल्पापेक्षया लाघवमेवैतत्कल्पानुसरणबीजभूतं निष्कृत्यूहमिति। यदि च गुरुधर्म्मोनाभावप्रतियोगितावच्छेदकस्तदा महानसवृत्तित्वत्वाद्यवच्छिन्नाभाववारणाय साध्याभाववद्वृत्तित्वत्वातिरिक्तेत्यनेन साध्याभाववद्वृत्तित्वत्वाघटकत्वमेव विवक्षणीयं तदर्थञ्च स्वाविषयकप्रतीतिवृत्तिसाध्याभाववद्वृत्तितात्वरूपविशिष्टनिरूपितविषयिताकत्वम्, एवञ्च गुरुवृत्तित्वत्वावच्छिन्नवृत्तेरभावोऽपि लक्षणघटक इति वृत्तिमद्वृत्तिपदसार्थक्यम्। स्वाविषयकत्वञ्च इतरविशेषणतानापन्नविषयिताशून्यत्वं, अतो विशेषणविधया साध्याभाववद्वृत्तित्वत्वघटकसाध्याभावत्वादेरपि तदघटकत्वनिर्व्वाह इति पूर्व्वोक्तदोषानवकाशः। चरमापि विषयिता इतरविशेषणतानापन्ननिरूपितैव ग्राह्या, तेन वृत्तित्वादिविशेषणकज्ञाने साध्याभाववद्वृत्तित्वत्वादेर्विशेषणतया विषयत्वेऽपि वृत्तित्वादेर्न साध्याभाववद्वृत्तित्वत्वाघटकत्वम्। न च साध्याभाववद्वृत्तित्वत्वघटकधर्म्मपर्य्याप्तप्रतियोगितावच्छेदकताकोऽभावो निवेश्यतां, घटकान्तार्थञ्च स्वाविषयकप्रतीत्यवृत्तिसाध्याभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयिताकत्वं, न तु स्वाविषयकप्रतीत्यविषयताद्दृशविशिष्टकत्वं, तत्तदभाववद्वृत्तितात्वविषयकप्रतीतौ केवलाधेयत्वतात्वस्य विषयतया तदभाववन्निरूपितत्वविशिष्टाधेयतात्वे तदविषयकप्रतीत्यविषयत्वस्य दुर्घटतया तदभाववद्वृत्तित्वत्वादेस्तदघटकत्वानिर्व्वाहात् केवलाधेयतात्वस्यैव तदघटकतया वृत्तिमद्वृत्तित्वं तेन रूपेण

घटाद्यभावमादायातिव्याप्त्यापत्तेरिति वाच्यम्। तथासत्युक्तरीत्या विषयतासम्बन्धेन यत्र हेतुता तत्र तादृशाभावाप्रसिद्ध्या घट-भिन्नं मेयत्वादित्यादौ निर्विशेषणकघटत्वादिवृत्तितात्वस्य यथा समानाधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तितात्वघटकत्वं तथा वाच्यम् ज्ञेयत्वादित्यादावपि तादृशस्य स्वाविषयकप्रतीत्यविषय-व्यधिकरणधर्म्मावच्छिन्नसाध्याभावविशेषितघटत्वादिघटिततदभाव-वद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयताकतया तदभाववद्वृत्तित्व-त्वघटकतया वृत्तिमद्वृत्तितदवच्छिन्नाभावस्य हेतावसत्त्वेनाव्या-प्त्यापत्तेः तत्तदभाववद्वृत्तित्वत्वाघटकधर्म्मावच्छिन्नाभावनिवेशेनैव वारणसम्भवात्। तादृशधर्म्मे निरुक्तसाध्याभाववद्वृत्तित्वत्वघट-कत्वसत्त्वेऽपि स्वाविषयकप्रतीतिवृत्तिसाध्याभाववद्धर्म्मान्तरवृत्ति-त्वविषयिताकत्वेन साध्याभाववद्वृत्तित्वाघटकत्वस्यापि सत्त्वेन तदवच्छिन्नाभावस्य यथानिरुक्ताभावानात्मकत्वात्। न च स्वावि-षयकप्रतीत्यवृत्तितदभाववद्वृत्तित्वत्वनिरूपितविषयितासामान्यक-त्वरूपतत्तदभाववद्वृत्तित्वत्वघटकतया निवेशे निर्विशेषणक-घटत्वादिवृत्तित्वत्वस्य साध्याभाववद्वृत्तित्वत्वघटकत्वाप्रसक्त्या तदघटकधर्म्मावच्छिन्नाभावनिवेशोऽपि सम्भवतीति वाच्यम्। तथा सति व्यापकताघटितसामान्यपदार्थनिवेशेन तदघटकधर्म्मानव-च्छिन्नाभावनिवेशापेक्षया अतिगौरवात्। समानाधिकरणपद-सार्थक्यन्तु उक्तरीत्यैवेति ध्येयम् (१)।

केचित्तु व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वेन पर्व्वत-

(१) यदि चेत्यादिः ध्येयमित्यन्तः पाठः बहुषु आदर्शपुस्तकेषु नास्ति।

वृत्तित्व-घटान्यतराद्यभाववारणाय एतन्मतेऽपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वकत्वं प्रतियोगिताविशेषणमावश्यकम्। तथाच साध्याभाववद्वृत्तित्वत्वेन घटाद्यभावस्य लक्षणघटकता न सम्भवतीति(१) निषेधद्वयनिवेशन-समानाधिकरणपदोपादानयोः सार्थकतेत्याहुः।

वस्तुतस्तु साध्याभाववद्वृत्तित्वातिरिक्तत्वं साध्याभाववद्वृत्तित्वाघटकत्वं तच्च स्वं यादृशविशिष्टं तादृशविशिष्टाविषयकप्रतीतिविषयसाध्याभाववद्वृत्तित्वत्वकत्वम् एवञ्च महानसवृत्तित्वस्य महानसत्वविशेषितमहानसवृत्तित्वत्वाविषयकप्रतीतिविषयसाध्याभाववद्वृत्तित्वत्वकत्वात् साध्याभाववद्वृत्तित्वाघटकत्वेन न तद्धर्मावच्छिन्नाभावमादाय दोषप्रसक्तिः, एवञ्च गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वेऽपि घटभिन्नं मेयत्वादित्यादौ घटत्वविशेषितघटवृत्तित्वस्य न स्वाविषयकप्रतीतिविषयसाध्याभाववद्वृत्तित्वत्वकत्वं साध्याभावत्वेन घटत्वविषयकसाध्याभाववद्वृत्तित्वप्रतीतौ घटत्वविशेषितघटवृत्तित्वत्वाविषयकत्वासम्भवात्। एवं घटत्वभिन्नं प्रमेयत्वादित्यादौ घटत्वत्वविशेषितघटत्ववृत्तित्वत्वस्य न स्वाविषयकप्रतीतिविषयसाध्याभाववद्वृत्तित्वत्वकत्वं साध्याभावत्वेन घटत्वत्वविषयकसाध्याभाववद्वृत्तित्वत्वविषयकप्रतीतौ घटत्वत्वविशेषितघटत्ववृत्तित्वत्वविषयकत्वासम्भवादिति न तदुभयत्रातिव्याप्तिः। न वा वृत्तिमद्वृत्तिपदवैयर्थ्यं वृत्तित्वत्वस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाघटकत्वविरहेण तद्धर्मावच्छिन्नाभाववार-

(१) साध्याभाववद्वृत्तित्वत्वस्य घटनिष्ठप्रतियोगिताव्यापकत्वविरहादिति शेषः।

णार्थं तदुपादानात् साध्याववदवृत्तित्वत्वावच्छेदेन च स्वाविषयक-प्रतीतिविषयत्वं विवक्षणीयम्। तथाच स्वाविषयकप्रतीतिनिरूपितसाध्याभाववदवृत्तित्वत्वावच्छिन्नविषयताकत्वं पर्य्यवसितम्। अन्यथा साध्याभाववद्विशेषितवृत्तित्वत्वस्य विशेष्यीभूतकेवलवृत्तित्वत्वानतिरेकितया विशेष्यीभूतवृत्तित्वत्वस्य साध्याभाववदवृत्तित्वत्वाविषयककेवलाधेयतात्वविषयकप्रतीतिविषयत्वे साध्याभाववदवृत्तित्वस्य तथात्वावश्यकतया तदघटकत्वप्रसङ्गेन केवलवृत्तित्वत्वावच्छिन्नाभावमादाय व्यभिचारिण्यतिप्रसङ्गापातात्। न च महानसवृत्तित्वत्वावच्छिन्नाभाववारणार्थं साध्याभाववदवृत्तित्वत्व-घटकधर्म्मावच्छिन्नाभाव एव निवेश्यतां तदघटकत्वञ्च स्वाविषयकप्रतीत्यविषयसाध्याभाववदवृत्तित्वत्वकत्वं किं निषेधद्वय-समानाधिकरणपदयोरुपादानेनेति वाच्यम्। एवं सति विशिष्टानुयोगिकाभावानभ्युपगमे साध्याभाववदवृत्तित्वत्वेऽपि साध्याभाववदवृत्तित्वत्वरूपविशिष्टाविषयककेवलाधेयतात्वविषयकप्रतीतिविषय-त्वाभावासत्त्वेन तस्य घटकत्वानिर्व्वाहेण केवलवृत्तित्वत्वस्यैव तद्-घटकतया तदवच्छिन्नसमानाधिकरणधर्म्मावच्छिन्नाभावस्य च वृत्तिमदवृत्तितया व्यभिचारिण्यतिप्रसङ्गापातात्। न च स्वाविषयकप्रतीत्यवृत्तिसाध्याभाववदवृत्तित्वत्वरूपविशिष्टनिरूपितविषयताकत्वरूपघटकत्वमेव निवेश्यतां तथा सति नोक्तदोष इति वाच्यम्। तथा सति विषयतासम्बन्धेन यत्र हेतुता तत्र तादृशाभावाप्रसिद्धापत्तेः। एवं घटत्वभिन्नं मेयत्वादित्यादौ निर्व्विशेषणघटत्वादिवृत्तित्वत्वस्य यथा समानाधिकरणधर्म्मावच्छिन्नसाध्याभाव-

वद्वृत्तित्वत्वघटकत्वं तथा वाच्यं ज्ञेयत्वादित्यादावपि तादृशस्य स्वाविषयकप्रतीत्यवृत्तिव्यधिकरणधर्म्मावच्छिन्नसाध्याभावविशेषि-- तघटत्वादिघटिततदभाववद्वृत्तित्वत्वविषयताकत्वेन तदभाववद्-वृत्तित्वत्वघटकतया वृत्तिमद्वृत्तितदवच्छिन्नाभावस्य हेतावसत्त्वे-नाव्याप्तेस्तदभाववद्वृत्तित्वत्वाघटकधर्म्मानवच्छिन्नाभावनिवेशे च न दोषः तादृशधर्म्मे निरुक्तसाध्याभाववद्वृत्तित्वत्वघटकत्वसत्त्वेऽपि स्वाविषयकप्रतीति-निरूपितसाध्याभाववद्धर्म्मान्तरवृत्तित्वत्वविषय-ताकत्वेन साध्याभाववद्वृत्तित्वत्वाघटकत्वस्यापि सत्त्वेन तदव-च्छिन्नाभावस्य यथानिरुक्ताभावानात्मकत्वात्। न च स्वाविषय-कप्रतीत्यवृत्तिसाध्याभाववद्वृत्तित्वत्वनिरूपितविषयितासामान्यक-- त्वरूपतत्तदभाववद्वृत्तित्वत्वघटकतानिवेशे निर्विशेषणकघटत्वा-दिवृत्तित्वत्वस्य साध्याभाववद्वृत्तित्वत्वघटकत्वाप्रसक्त्या तद-घटकधर्म्मावच्छिन्नाभावनिवेशोऽपि सम्भवतीति वाच्यम्। तथा सति व्यापकताघटितसामान्यपदार्थनिवेशेन घटकधर्म्मानवच्छि-न्नाभावनिवेशापेक्षयातिगौरवात्। अत्र विषयत्वं मुख्यविशेष्यत्वं, तेन घटवृत्तित्वत्वावच्छिन्नसाध्यके तादात्म्येन घटत्वव्यापकादि-हेतौ घटवृत्तित्वत्वस्य साध्याभाववद्वृत्तित्वत्वाघटकत्वविरहेण तद-वच्छिन्नाभावमादाय नाव्याप्तिः। न च तथापि सास्नाभाववान् द्रव्यत्वादित्यादावतिव्याप्तिः तत्र सास्नावद्वृत्तित्वत्वस्य गुरुतया गोत्ववद्वृत्तित्वत्वस्य च तदघटकत्वेन व्यधिकरणधर्म्मावच्छिन्ना-भावस्यैव संग्रहादिति वाच्यम्। गोत्वाद्यभावादेरपि सास्नाद्यभाव-रूपसाध्यव्यापकतया गोत्वादिरूपतदभावस्यापि लक्षणघटकत्वात्

तद्वद्वृत्तित्वत्वस्य च तद्वद्वृत्तित्वत्वाघटकत्वविरहेण दोषाभावात्। एवं जातिभिन्नं घटत्वत्वादित्यादौ जातित्वादिविशेषितघटत्वादिवृत्तित्वत्वस्य तद्विशेषितघटत्वादिवृत्तित्वत्वाविषयकप्रतीतिविषयत्वेन प्रत्येकं जातित्वविशेषितसकलजातिवृत्तित्वत्वस्य जातिभेदाद्यभाववद्वृत्तित्वत्वाघटकत्वेऽपि घटत्वादिवृत्तित्वत्वस्य घटत्वत्वावच्छिन्नघटत्वभेदरूप-साध्यव्यापकाभाववद्वृत्तित्वाघटकत्वविरहेण तदवच्छिन्नाभावमादायैवातिव्याप्तिवारणसम्भवात्। न च साध्याभाववद्वृत्तित्वत्वघटकधर्म्मानवच्छिन्नाभाव एव निवेश्यतां किं समानाधिकरणपदोपादानेन केवलान्वयिसाध्यकस्थले वृत्तित्वेन घटाभावमादायैव लक्षणसमन्वयसम्भवादिति वाच्यम्। वृत्तित्वत्वेन पर्य्यवसितवृत्तित्व-घटान्यतराभावमादायाव्याप्तिवारणाय एतन्मतेऽपि साध्याभाववद्वृत्तित्वत्वव्याप्यत्वस्य प्रतियोगितायां निवेशस्यावश्यकतया घटत्वेन साध्याभाववद्वृत्तित्वाभावसंग्रहाय समानाधिधिकरणपदोपादानस्यावश्यकत्वादिति दिक् (१)। प्रतियोगितायां साध्याभाववद्वृत्तित्वत्वव्याप्यत्वनिवेशप्रयोजनमाह, 'आलोकाद्यवृत्तित्वेनेति वह्निसामान्याभाववद्वृत्तित्वस्य योऽभावस्तस्य धूमादावसत्त्वेपीत्यन्वयः। वह्निसामान्याभावो वह्नित्वावच्छिन्नो वह्न्यभावः। साध्याभाववद्वृत्तित्वत्वव्यापकतानिवेशनप्रयोजनमाह, 'यत्रेति, 'इन्धनत्वाद्यवच्छिन्नेति, साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेद-

---

(१) वस्तुतस्त्वित्यादिः इति दिगित्यन्तः पाठः बहुषु आदर्शपुस्तकेषु नास्ति।

करूपावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघटकतया घटत्वाद्यवच्छिन्नाभावोपेक्षणं, 'महानसवृत्तित्वादेरभाव इत्यत्र महानसवृत्तित्वत्वादिनेति बोध्यं, तादृशाभावाधिकरणमहानसवृत्तित्वत्वाद्यवच्छिन्नस्येति वा षष्ठ्यन्तार्थः । न च गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वेऽपि तादृशाभावाविशेषितमहानसवृत्तित्वत्वावच्छिन्नाभावमादायैव दोषप्रसक्तेस्तद्विशेषितमहानसवृत्तित्वत्वावच्छिन्नाभावपर्य्यन्तानुसरणे सन्दर्भविरोध इति वाच्यम् । अधिकरणत्वान्तस्योपलक्षणतया शेषांशस्य विशेषणतया विवक्षणेनानुपपत्त्यभावात् । अधिकरणविशेषानुपरक्तवृत्तेरभावमादायापि दोषं दर्शयति, 'स्वनिष्ठेति धूमादिनिष्ठसाध्याभाववद्वृत्तित्वव्यक्तेस्तद्व्यक्तित्वावच्छिन्नाभावस्येत्यर्थः, 'हेत्वन्तरवृत्तेः' आलोकादिवृत्तेः, एतेन वृत्तिमद्वृत्तित्वमस्तीति सूचितं, 'स्वस्मिन्' धूमादौ, अत्र च लक्षणे सत्ताभाववान् द्रव्यत्वादित्यादौ सत्तावत्समवेतत्वाभावस्य व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकस्यैव समवेतवृत्तित्वेऽपि द्रव्यावृत्तित्वाद्यवच्छिन्नाभावस्यापि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकतया समानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकस्यापि तद्वत्समवेतत्वाभावस्य समवेतगुणत्वादिवृत्तितया द्रव्यत्वादेस्तद्वत्त्वाभावान्नातिव्याप्तिः । एवमवृत्तिसाध्यकस्थलेऽपि साध्यतावच्छेदकावच्छिन्नव्यापकत्वाप्रसिद्ध्या नातिव्याप्तिः । कूटघटितलक्षणे च तत्र तत्रातिव्याप्तिवारणाय साध्यसमानाधिकरणत्वे सतीति विशेषणं देयं, एतल्लक्षणे चावृत्तिहेतुकातिव्याप्तिवारणाय वृत्तिमत्त्वमात्रमुपादेयं, कूटघटितलक्षणवद-

त्रापि महाकालान्योघटादित्यादावतिव्याप्तिर्द्रष्टव्या, किन्तु तदन्यदोषानामिवात्रानवकाश इत्यवधेयम्।

इति कूटाघटितलक्षणव्याख्या।

तत्त्वचिन्तामणि-दीधितिः।

कूटघटितलक्षणम्।

अन्ये तु वृत्तिमद्वृत्तयो यावन्तः साध्याभावसमुदायाधिकरणवृत्तित्वाभावास्तद्वत्त्वं, तादृशवृत्तित्वाभावश्च स्वव्यापकतादृशवृत्तित्वत्वव्यापकप्रतियोगिताको बोध्यः, प्रयोजनञ्चोक्तप्रायम्। साध्याभावाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्म्मावच्छिन्नस्यैवाभावस्य वृत्तिमद्वृत्तित्वाद्व्यभिचारिण्यतिव्याप्तिरतः समुदायेति। साध्याभावश्च साध्यतावच्छेदकसम्बन्धेन बोध्यः तेन समवायेन वह्नेः साध्यत्वे धूमे संयोगेन च तथात्वे वह्न्यवयवत्वे पर्व्वत-वह्न्यवयवसंयोगे च पर्व्वतस्य वह्न्यवयवस्य च सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयानधिकरणत्वेऽपि नातिव्याप्तिः।

गादाधरी विवृतिः।

'अन्ये त्विति, घटत्वादिना निर्धूमवृत्तित्वाद्यभावमादाय

व्यभिचारिण्यतिव्याप्तिवारणाय 'यावत्त्वोपादानं, एवञ्च (१) केवलान्वयिनः साध्यस्य व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकस्यैवाभावस्य प्रसिद्धा तत्समुदायाधिकरणजगद्वृत्तित्वस्यावृत्तौ प्रसिद्धः समानाधिकरणधर्म्मावच्छिन्नाभावोपि यावदन्तर्गत इति तद्वत्त्वविरहात्तादृशसाध्यके विषयिताद्यतिरिक्तसम्बन्धेन (२) हेतावव्याप्तिः । साधनसमानाधिकरणत्वेन साध्याभावविशेषणपक्षे च व्यतिरेकिसाध्यस्य व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकस्यैवाभावस्य सद्धेतौ लक्षणघटकतया जगत एव तत्कूटाधिकरणत्वाद्व्यतिरेकिसाध्यकेऽपि विषयितातिरिक्तसम्बन्धेन हेतावव्याप्तिरिति वृत्तिमद्वृत्तित्वमभावविशेषणं, 'तादृशवृत्तित्वेति साध्याभावसमुदायाधिकरणवृत्तित्वेत्यर्थः, 'प्रयोजनञ्चेति पूर्व्वदलप्रयोजनं, आलोकाद्यवृत्तित्वेन निर्वह्निवृत्तित्वाभावमादाय वह्निमान् धूमादित्यत्राव्याप्तिवारणं पूर्व्वलक्षणे उक्तमेव, चरमदलप्रयोजनन्तु साधनसमानाधिकरणत्वस्य साध्याभावाविशेषणत्वे केवलान्वयिसाध्यके ज्ञेयत्वादिहेतौ घटादिवृत्तित्वाभावमादायाव्याप्तिवारणमेव, न तु वह्निमान् धूमादित्यादौ महानसवृत्तित्वाद्यभावव्यावर्त्तनं तत्र महानसादेर्वह्नित्वाद्यवच्छिन्नवह्न्यभावानधिकरणत्वेन साध्याभावकूटा-

---

(१) वृत्तित्वाभावे यावत्त्वोपादाने चेत्यर्थः, अन्यथा घटत्वादिना जगद्वृत्तित्वाभावमादायैव लक्षणसमन्वयाद्वृत्तिमद्वृत्तित्वविशेषणस्य प्रथमतोऽव्यावर्त्तकत्वापत्तिरिति भावः ।

(२) विषयितासम्बन्धेन हेतौ जगद्वृत्तित्वस्य समानाधिकरणधर्म्मावच्छिन्नाभावोऽप्रसिद्ध एव अवृत्तेरपि विषयितासम्बन्धेन ज्ञानादौ सम्बद्धत्वात् इत्यत उक्तं विषयिताद्यतिरिक्तेति, आदिपदात् तादात्म्यपरिग्रहः ।

नधिकरणत्वात्, एतस्य च (१) प्रागनुक्तत्वात् 'उक्तप्रायमित्युक्तम्। समुदायपदप्रयोजनमाह, 'साध्याभावाधिकरणेति, 'व्यधिकरणधर्म्मावच्छिन्नाभावस्यैवेति, निर्धूमवृत्तित्वत्वाद्यवच्छिन्ननिर्धूमवृत्तित्वाद्यभावस्य प्रतियोगितया व्यधिकरणधर्म्मावच्छिन्नसाध्याभावाधिकरणमहानसादिवृत्तित्वावृत्तितया साध्याभावाधिकरणवृत्तित्वत्वाव्यापकतया जगद्वृत्तित्वसामान्याभावस्यैव तद्व्यापकप्रतियोगिताकतया तस्य च समानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकस्यावृत्तावेव प्रसिद्धत्वादिति भावः। 'व्यभिचारिण्यतिव्याप्तिरिति, तादृशस्य जगद्वृत्तित्वाभावस्य सर्व्वत्रैव सत्त्वादिति भावः। अत्र च स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्वकत्वे सति साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्यापकत्वं प्रतियोगिताविशेषणं, तत्र शेषदले समुदायानिवेशे निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावस्य लक्षणाघटकत्वेऽपि नातिव्याप्तिः सम्भवति व्यतिरेकिसाध्यके तादृशप्रतियागिताया एवाप्रसिद्धेर्जगद्वृत्तित्वसामान्याभावप्रतियोगितायाः साध्याभावाधिकरणवृत्तित्वत्वव्यापकत्वेऽपि स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्वकत्वरूपपूर्व्वदलविरहात्। धूमाद्यभावसमुदायाधिकरणवृत्तित्वत्वशून्ये महानसादिवृत्तित्वेऽपि दादृशप्रतियोगितायाः सत्त्वादिति पूर्व्वपक्षयित्वा शेषदले समुदायाप्रवेशे पूर्व्वदलमेव नोपादेयं तदनुपादानेऽपि वह्निमानधूमादित्यादौ आलोकाद्यवृत्तित्वाद्यवच्छिन्नाभावप्रतियोगित्वस्यालोकादिनिष्टपर्व्वतादिवृत्तित्वसाधारणसाध्या-

(१) केवलान्वयिसाध्यकाव्याप्तिवारणस्य।

भावाधिकरणवृत्तित्वत्वाव्यापकतया तादृशाभावमादाय दोषाप्रसक्तेः, तदुपादाने व्यतिरेकिसाध्यकमात्र एवोक्तरीत्या तादृशप्रतियोगित्वाप्रसिद्ध्या अव्याप्तिप्रसङ्गाच्च, तथाच धूमवान् वह्नेरित्यादौ घटत्वेन जगद्वृत्तित्वाभावमादायातिव्याप्तिरित्याशयेन दीधितिकृतेदमभिहितं, अतिव्याप्तिवारणाय शेषदले समुदायप्रवेशने च निर्वह्निवृत्तित्वत्वव्यापकप्रतियोगिताकस्यालोकावृत्तित्वावच्छिन्नाभावस्य वह्निमान् धूमादित्यत्र शेषदलाक्रान्ततया पूर्व्वदलोपादानमावश्यकं, तत्र च समुदायाप्रवेशे व्यधिकरणधर्म्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वत्वव्याप्यप्रतियोगिताकस्यालोकावृत्तिवृत्त्यभावस्य धूमेऽसत्त्वादव्याप्तिरिति तत्रापि तत्प्रवेशनमिति केचित् समादधति।

परे तु प्रतियोगित्वव्यापकत्वविशेष्यतापन्नमेव साध्याभावसमुदायाधिकरणवृत्तित्वत्वं व्यापकत्वविशेषणविधया निवेश्यते न तु तद्दलस्योक्तरीत्या द्विधा निवेशः, एवञ्च पूर्व्वपक्ष एवायं नावतरति। न च गुरुधर्म्मस्याभावप्रतियोगितानवच्छेदकत्वे प्रतियोगित्वव्यापकत्वविशेषितसाध्याभावसमुदायाधिकरणवृत्तित्वत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वत्वं नाभावप्रतियोगितावच्छेदकमिति तादृशावच्छेदकत्वत्वावच्छिन्नाभावरूपव्यापकतानिवेशासम्भवात् तद्दलस्य द्विधा निवेशनमावश्यकमिति वाच्यम्। व्यापकान्तस्योपलक्षणविधया साध्याभावसमुदायाधिकरणवृत्तित्वत्वरूपव्याप्यांशे निवेशसम्भवात् व्यापकतावच्छेदकावच्छिन्नाभाववानित्यादिज्ञाने व्यापकतावच्छेदकत्वांश-

स्यैव उक्तावच्छेदकत्वत्वावच्छिन्नप्रतियोगिताकत्वेनाभावबुद्धौ व्यापकताया उपलक्षणतया भानेऽविरोधात्। वस्तुतस्तु गुरुधर्म्मस्याभावप्रतियोगितानवच्छेदकत्वे साध्याभावसमुदायाधिकरणवृत्तित्वत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वत्वमपि नाभावप्रतियोगितावच्छेदकं वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वत्वादिरूपसमनियतधर्म्मापेक्षया व्यधिकरणधर्म्मावच्छिन्नसाध्याभावेनाधिकेन घटितस्य तस्य (१) गुरुत्वादिति तादृशधर्म्मावच्छिन्नाभावो निवेशयितुं न शक्यः, किन्तु तादृशान्योन्याभावप्रतियोगितावच्छेदकं यद्यत्तद्भेदकूटमेव निवेशनीयम्, एवञ्च प्रतियोगिताव्यापकत्वघटितोक्तधर्म्मस्य प्रतियोगितानवच्छेदकत्वमकिञ्चित्करमेवेत्याहुः।

'तेनेति, समवायेन वह्नेः साध्यत्वे पर्व्वतस्य सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयानधिकरणत्वेऽपि धूमे नातिव्याप्तिः, संयोगेन वह्निस्तथात्वे वह्न्यवयवस्य तादृशाभावद्वयानधिकरणत्वेऽपि वह्न्यवयवत्वे नातिव्याप्तिः, समवायेन वह्नेः साध्यत्वे संयोगेन तस्य तथात्वे च पर्व्वतस्य वह्न्यवयवस्य च तादृशाभावद्वयानधिकरणत्वेऽपि पर्व्वत-वह्न्यवयवसंयोगे नातिव्याप्तिरिति योजना, 'सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयं' संयोगसम्बन्धावच्छिन्नवह्न्यभाव-समवायसम्बन्धावच्छिन्नवह्न्यभावद्वयं, साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वानिवेशने तादृशाभावद्वयानधिकरणस्य पर्व्वतादेः साध्या-

(१) साध्याभावसमुदायाधिकरणवृत्तित्वत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वत्वस्य।

भावकूटानधिकरणतया तत्कूटाधिकरणवृत्तित्वाभावा यावन्तः तद्वत्त्वं धूमादावव्याहतमेवेत्यतिव्याप्तिः स्यादिति भावः। न च साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावनिवेशनेऽपि समवायेन वह्नौ साध्ये संयोगेन हेतौ धूमे नातिव्याप्तिर्वारयितुं शक्यते समवाय-सम्बन्धावच्छिन्नवह्न्यभावकूटाधिकरणसंयुक्तत्वस्य व्यधिकरणधर्मा-वच्छिन्नाभावस्यैव संयुक्तवृत्तित्वात् संयुक्तमात्रस्यैव तादृशाभावकूटा-धिकरणगगनादिसंयुक्तत्वादिति कथमत्र व्यावृत्तिप्रदर्शनं सम-वायेन धूमहेतुकस्थलपरता च न युज्यते समवायेन धूमवतः साध्याभावकूटाधिकरणत्वानिराकरणादिति वाच्यम्। संयुक्त-मात्रस्य गगनादिसंयुक्तत्वेऽपि तादृशसंयोगस्य वृत्त्यनियामकतया संयोगेन वह्न्यवयवान्यवृत्तित्वाभावस्य संयोगेन वृत्तिमद्वृत्तेः सुलभतया (१) वृत्तिपदस्य यथाश्रुतपरतामते तादृशव्यावृत्तिदान-सङ्गतेः, वृत्त्यनियामकतादात्म्यादिसम्बन्धेन व्याप्तिस्वीकारे वृत्ति-पदस्य सम्बन्ध्यर्थकत्वमावश्यकमित्यभिप्रायेण तदुपेक्ष्य द्वितीय-स्थलानुसरणं, साधनसमानाधिकरणत्वस्य साध्याभावविशेषणत्वपक्षे समवायसम्बन्धावच्छिन्नवह्न्यभावस्य वह्न्यवयवत्वादिरूपसाधनस-मानाधिकरणत्वाभावेन न तत्रातिव्याप्तिसम्भवः, एवं सत्ताभाववान् द्रव्यत्वादित्यादावतिव्याप्तिवारणाय साध्यसामानाधिकरण्ये सतीति विशेषणप्रवेशस्यावश्यकतया संयोगादिना वह्निमत्यवर्त्तमान-

---

(१) संयुक्तमात्रस्य गगनादिसंयुक्तत्वेऽपि तादृशसंयोगस्य वृत्त्यनियामकस्य तथा यस्य द्रव्यस्य वह्न्यवयव एवाधिकरणत्वप्रत्ययः प्रामाणिको न त्वन्यत्र संयोगेन वह्न्य-वयवान्यवृत्तित्वाभावस्य संयोगेन वृत्तिमत्तादृशद्रव्यवृत्तेः सुलभतयेति पा०।

वह्न्यवयवत्वादौ तेनाप्यतिव्याप्तिर्व्वारयितुं शक्यत इत्यतः 'पर्व्वत-वह्न्यवयवसंयोगहेतुकानुसरणं, संयोगेन द्रव्यस्याव्याप्यवृत्तितापत्ते पर्व्वतस्य सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयाधिकरणत्वेऽपि न तस्य व्याप्यवृत्तित्वविशिष्टसाध्याभावकूटाधिकरणत्वं विवक्षणीयञ्चावश्यं तादृशसाध्याभावकूटवत्त्वम्, अन्यथा अव्याप्यवृत्तिसंयोगादिसाध्यके व्यभिचारिणि जगत एव साध्याभावकूटाधिकरणत्वेनातिव्याप्ति-रिति दर्शितहेतोः पर्व्वतवृत्तित्वेऽपि तादृशाभावकूटाधिकरणवृ-त्तित्वाभावोऽक्षत एवेत्यतिव्याप्तिप्रसक्तिः।

तत्त्वचिन्तामणि-दीधितिः।

तथा स्वव्यापकीभूतसाध्यतावच्छेदकव्यापकप्रति-योगिताकोऽपि वोध्यः तेन यत्र पृथिवीत्वाभावादौ साध्ये तत्तद्विपक्षावृत्तित्वाद्यवच्छिन्नप्रतियोगिताका-भावकूटाधिकरणमप्रसिद्धं तत्र सद्धेतौ पृथिवीत्वादौ साध्ये जातित्वाद्यवच्छिन्नाभाववति सामान्यादाववर्त्त-माने द्रव्यत्वप्रकारकप्रमाविषयत्वादौ च नाव्याप्तिरति-व्याप्तिर्वा, नाप्यभावत्वादिना अभावादौ साध्ये तत्त-त्साध्याभावकूटाधिकरणाप्रसिद्ध्या अव्याप्तिरित्याहुः।

गादाधरी विवृतिः।

पूर्व्ववदत्र साध्याभावपदेन साध्यतावच्छेदकविशिष्टव्यापकता-वच्छेदकरूपावच्छिन्नाभावविवक्षणे नानाविपक्षके तथाविधतत्त-

द्विपचावृत्तित्वावच्छिन्नाभावकूटाधिकरणाप्रसिद्धा अव्याप्तिः सा-ध्यतावच्छेदकविशिष्टसमव्यापकतावच्छेदकावच्छिन्नाभावनिवेशने च गौरवमिति साध्यतावच्छेदकसमव्याप्तप्रतियोगिताकाभाव एव विवक्षितुमुचितः तार्णतार्णदहनवृत्तिद्वित्वाद्यवच्छिन्नप्रतियोगिताकानां तथाविधसाध्याभावानामधिकरणे धूमादेर्वृत्तावपि वह्नित्वाद्यवच्छिन्नवह्न्यभावघटिततादृशाभावकूटवत्यवृत्तेरव्याप्त्यनवकाशात् इत्याशयेन तथाविधमेवाभावं निवेशयति, 'तथेति, 'स्वं' प्रतियोगिता, समनियताभावैक्यमते साध्याभावप्रतियोगितायाः साध्याभावसमनियताभावप्रतियोगिपदार्थान्तरवृत्तित्वेऽपि (१) साध्यतावच्छेदकेन व्यधिकरणेन वा धर्म्मेणावच्छिन्नायाः साध्यमात्रवृत्तिप्रतियोगितायाः साध्यतावच्छेदकसमनैयत्यमक्षतमेव । अथ घटत्वाद्यवच्छिन्ना या वाच्यत्वनिष्ठप्रतियोगिता सा घटादिभिन्नयावद्वस्तुवृत्तिरेव स्वीक्रियते न तु वाच्यत्वादिमात्रवृत्तिस्तथा सति घटत्वेन प्रमेयत्वं नास्तीत्यादिप्रतीतिविषयप्रतियोगितान्तरकल्पने गौरवादिति तादृशप्रतियोगितायां न वाच्यत्वत्वादिरूपसाध्यतावच्छेदकसमनैयत्यमिति चेत्, का क्षतिः, वाच्यत्वभिन्नत्वेन वाच्यत्वं नास्तीत्यादिप्रतीतिविषयमभावमादायैव तल्लक्षणसमन्वयसम्भवात् स्वव्यधिकरणवाच्यत्वभिन्नत्वावच्छिन्नायाः प्रतियोगिताया वाच्यत्वभिन्नवृत्तित्वस्यासम्भावितत्वात् । वस्तुतस्तु घटत्वाद्यवच्छिन्नवाच्यत्वाद्यभावप्रतियोगितायां व्यधिकरणघटत्वादेरिव समानाधिकर-

---

(१) साध्यसमनियतपदार्थान्तरवृत्तित्वेऽपीति पा० ।

णवाच्यत्वत्वादेरप्यवच्छेदकत्वमावश्यकं घटत्वेन वाच्यत्वं नास्तीत्यादिप्रतीत्या वाच्यत्वत्वादेः प्रतियोगितावच्छेदकत्वानवगाहनात् तादृशप्रतीतेर्वाच्यत्वत्वादिविशिष्टवैशिष्ट्यानवगाहित्वेन तत्र वाच्यत्वत्वादिप्रकारकज्ञानानपेक्षापत्तेः, एवञ्च घटत्वेन प्रमेयं नास्तीत्यादिप्रतीतिविषयप्रतियोगितानामतिरिक्तत्वमावश्यकम् अवच्छेदकभेदादिति घटत्वेन वाच्यत्वं नास्तीत्यादिप्रतीतिविषयप्रतियोगिता वाच्यत्वादावेव वर्त्तते न त्वन्यत्रापि मानाभावादिति घटत्वादिना वाच्यत्वाद्यभावोऽपि लक्षणघटकः। अथैवं साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावघटितलक्षणे वह्नित्वाद्यवच्छिन्नसाध्यकस्थले वह्नित्वादिना घटाद्यभावोलक्षणघटको न स्यात् व्यापकतावच्छेदकवह्नित्वादिपर्य्याप्तप्रतियोगितावच्छेदकताकत्वविरहान्महानसीयवह्नित्वाद्यवच्छिन्नाभाववारणायावच्छेदकतापर्य्याप्तिविवक्षणस्यावश्यकत्वादिति चेन्न, व्यापकतावच्छेदकपर्य्याप्तत्वं हि व्यापकतानवच्छेदकावृत्तित्वं तच्चेन्धनत्वाद्यवच्छिन्नवह्न्यभावप्रतियोगितावच्छेदकतायामक्षतमिति तादृशाभावमादायैव तत्तल्लक्षणसमन्वयसम्भव इति। एवञ्च सार्व्वभौमानामेतल्लक्षणाभिप्रायकतया 'समवायितया वाच्यत्वाभावो घट एव प्रसिद्ध' इति मूलग्रन्थोपवर्णनमपि सङ्गच्छते। अथ पर्य्याप्तिसम्बन्धेन यत्रोभयत्वादिकं साध्यतावच्छेदकं तत्र प्रतियोगिताया अव्यासज्यवृत्तित्वेन तत्पर्य्याप्त्यधिकरणे प्रत्येकव्यक्तौ पर्य्याप्तिसम्बन्धेनोभयत्वादिव्यक्तेरत्यन्ताभावस्य तदवच्छिन्नभेदस्य च सत्त्वात्तस्य प्रतियोगिताव्यापकत्वं न सम्भवति। न चाव्याप्यवृत्तिसंयोगादेर्यत्र साध्यताव-

च्छेदकता तत्र तस्य प्रतियोगिताव्यापकत्वनिर्व्वाहाय प्रतियोग्य-सामानाधिकरण्यं व्यापकताघटकाभावे निवेशनीयं तावता उभ-यत्वस्यापि व्यापकत्वं निर्व्वहति पर्य्याप्तिसम्बन्धेनोभयत्वपर्य्याप्त्य-धिकरणस्य प्रत्येकानतिरिक्ततया प्रत्येकवृत्तेरुभयत्वाभावस्यापि प्रतियोगिसमानाधिकरणत्वादिति वाच्यम्। पृथिवीत्व-घटत्वो-भयत्वादिना यत्र साध्यता तत्र जातित्वाद्यवच्छिन्नाभावप्रतियो-गित्वसमानाधिकरणस्य तादृशसाध्यतावच्छेदकाभावस्य प्रतियो-ग्यधिकरणावृत्तित्वविरहेण तादृशसाध्यतावच्छेदकस्य तादृशप्रति-योगिताव्यापकत्वापत्त्या तादृशाभावमादाय द्रव्यत्वप्रकारकप्रमा-विषयत्वादिहेतावतिव्याप्त्यापत्तेः प्रतियोग्यनधिकरणवृत्तित्वस्यैवा-भावे निवेशनीयतया उभयत्वाभावव्यावर्त्तनासम्भवात् तदभाव-वतः प्रत्येकं तदनधिकरणत्वात् तस्यैव तदधिकरणताया अपि व्यासज्यवृत्तित्वादिति चेन्न, सामानाधिकरण्यस्याव्याप्यवृत्तितापत्ते प्रतियोगिसामानाधिकरण्याभावविशिष्टाभाववत्ताघटितव्यापक-ताया एव निवेशसम्भवात् पृथिवीत्वादौ उक्तोभयत्ववति पृथिवीत्व-त्वावच्छेदेन तदभावस्य प्रतियोगिसमानाधिकरणत्वेऽपि जलत्वा-देस्तत्सामानाधिकरण्याभावविशिष्टतदभाववत्त्वेनातिप्रसङ्गाभावात् उभयत्वाद्यभावस्य तदभाववत्येकैकस्मिन्नपि तत्सामानाधिकरण्या-भावानभ्युपगमात्। तत्सामानाधिकरण्यावच्छेदकस्य प्रत्येका-नतिरिक्तत्वात्। अथवा यन्निरूपितसाध्यतावच्छेदकताघटक-सम्बन्धसामान्ये प्रतियोगित्वाधिकरणयत्किञ्चिद्वृत्त्यनुयोगिकत्वा-भावस्तदन्यत्वमेव प्रतियोगिताव्यापकत्वम् उभयत्वनिरूपितप-

र्य्याप्तौ च न प्रत्येकानुयोगिकत्वाभावः उभयस्य प्रत्येकानतिरिक्तत्वादिति।

यत्तु प्राचीनमते रूपसामान्याभावस्य रूप-तद्ध्वंस-तत्प्रागभावत्रितयप्रतियोगिकतया रूपध्वंसादिसाध्यके रूपादिहेतावतिव्याप्तिः रूपसामान्याभावीयरूपध्वंसत्वाद्यवच्छिन्नप्रतियोगितायाः साध्यतावच्छेदकसमनियततया तद्घटिताभावकूटाधिकरणे रूपादेरवृत्तेः। न च रूपस्यापि रूपध्वंसाभावरूपतया तद्घटितस्य रूपसामान्याभावाद्यघटितकूटस्यापि यावतामभावानामैकाधिकरण्यमिति विवक्षया लक्षणघटकत्वात् तद्वति हेतोर्वृत्त्या नोक्तातिव्याप्तिरिति वाच्यम्। रूपादीनां प्रत्येकं स्वस्वध्वंसाभावरूपत्वेऽपि स्वान्यरूपादिध्वंसाद्यभावानात्मकतया साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वविरहेण लक्षणाघटकत्वादिति, तन्न, जलपरमाण्वादौ रूपध्वंसत्वाद्यवच्छिन्नाभावबुद्धिनिर्व्वाहाय जन्यरूपत्वाद्यवच्छिन्नाभावे रूपध्वंसत्वावच्छिन्नप्रतियोगिताकत्वकल्पनस्यावश्यकतया तत एव रूपादिसामान्याभाववत्यपि तत्प्रतीतिनिर्व्वाहात् रूपादिसामान्याभावस्य रूपध्वंसादिप्रतियोगिताकत्वानभ्युपगमात्, साधनसमानाधिकरणत्वस्य साध्याभावविशेषणतापत्ते तेनाप्युक्तस्थले रूपादिसामान्याभावव्यावर्त्तनात्, स्वनिरूपकाभाववत्त्वसम्बन्धेन साध्यतावच्छेदकसमनियतप्रतियोगिताकूटाधिकरणत्वमेव निवेश्य लक्षणस्य परिष्करणीयतया रूपादिसामान्याभावानधिकरणस्यापि जलपरमाण्वादेरुक्तस्थले तत्कूटाधिकरणत्वेनातिव्याप्त्यनवकाशाच्च। प्रतियोगितायाः प्रतियोगिस्वरूपत्वमते ना-

नाव्यक्तिसाध्यकस्थले साध्यतावच्छेदकसमनैयत्यस्य प्रत्येकप्रतियोगितायामसत्त्वेऽपि स्वावच्छेदकावच्छिन्नतदभावीयप्रतियोगितात्वेन (१) समनैयत्यविवक्षणान्न दोषः तत्तद्वह्नि-तत्तद्धूमादिस्वरूपप्रतियोगितानामपि स्वावच्छेदकवह्नित्व-धूमत्वाद्यवच्छिन्नतदभावप्रतियोगितात्वेन वह्नित्व-धूमत्वादिसमनैयत्यात् वह्नित्व-धूमत्वाद्यवच्छिन्नवह्न्यादिस्वरूपप्रतियोगितानां द्रव्यत्वाद्यवच्छिन्नाभावीयवह्न्यादिस्वरूपप्रतियोगितात्मकतया तदवच्छेदकद्रव्यत्वाद्यवच्छिन्नप्रतियोगितायाश्च घटादावपि सत्त्वात् न तत्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितात्वेन वह्नित्वादिसमनैयत्यमिति तदभावीयत्वं विशेषणं, तथा सति वह्नित्वाद्यवच्छिन्नाभावीयप्रतियोगितायाः घटादावसत्त्वात् नानुपपत्तिः। यद्यप्येवमपि वाच्यत्वत्वादिसमनियतप्रतियोगित्वाप्रसिद्धिर्दुर्व्वारैव व्यधिकरणधर्म्मावच्छिन्नाभावानामभिन्नतया वाच्यत्वादिनिष्ठं तत्स्वरूपवाच्यत्वभिन्नत्वाद्यवच्छिन्नवाच्यत्वाभावीयप्रतियोगितायाः घटत्वाद्यवच्छिन्नवाच्यत्वादिनिष्ठतत्स्वरूपप्रतियोगित्वाद्भिन्नत्वेन तदवच्छेदकघटत्वाद्यवच्छिन्नप्रतियोगितानां घटादावपि सत्त्वात् (२) यत्किञ्चिदेकधर्म्मावच्छिन्नतदभावीयप्रतियोगितात्वेन समनैयत्यघटकव्याप्यत्व-

---

(१) तदभावीयप्रतियोगितात्वेन समनैयत्यविवक्षणे साध्यतावच्छेदकसमनियततदभावीयप्रतियोगिताकाभावस्याप्रसिद्ध्या वह्निमान् धूमादित्यादावव्याप्तिरतः स्वावच्छेदकावच्छिन्नेति।

(२) व्यधिकरणधर्म्मावच्छिन्नाभावानामभिन्नतया वाच्यत्वादिस्वरूपवाच्यत्वभिन्नत्वाद्यवच्छिन्नाभावीयप्रतियोगितावच्छेदकघटत्वाद्यवच्छिन्नप्रतियोगितानां घटादावपि सत्त्वादिति पा०।

विवक्षणे च पृथिवीत्वाद्यभावादिसाध्यकस्थले घटावृत्तित्वाद्यवच्छिन्नाभाववारणमशक्यं तदभावीयपृथिवीत्वाभावादिरूपप्रतियोगितानां पृथिवीत्वाभावत्वाद्यवच्छिन्नाभावीयप्रतियोगितात्मकतया पृथिवीत्वाभावत्वादिरूपतदवच्छेदकावच्छिन्नप्रतियोगितात्वेन पृथिवीत्वाभावत्वादिसमनैयत्यसत्त्वात्, तथापि यद्धर्म्मावच्छिन्नप्रतियोगितात्वेन यदभावनिरूपितत्वं तादृशधर्म्मावच्छिन्नतदभावीयप्रतियोगितात्वेनैव व्याप्यत्वनिवेशान्न दोषः पृथिवीत्वाभावत्वावच्छिन्नप्रतियोगितात्वेन पृथिवीत्वादिरूपाभावमात्रनिरूपितत्वं न तु घटावृत्तित्वावच्छिन्नाभावनिरूपितत्वमिति। यद्यपि पूर्व्वदलाप्रवेशे वह्न्यादिसाध्यके धूमादिहेतौ साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकव्यापकप्रतियोगिताकतत्तद्वृदावृत्तित्वावच्छिन्नाभावकूटाधिकरणत्वस्य गुणादौ प्रसिद्धत्वेऽपि तत्र हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्या अव्याप्तिसम्भवः तथापि साध्याभावकूटवति तादृशवृत्तेरप्रसिद्ध्या अव्याप्तिस्तदनिवेशेऽपि सत्तावान् जातेरित्यादौ वक्ष्यते इति स्थलान्तरे कूटाधिकरणाप्रसिद्ध्या अव्याप्तिवारणरूपतत्प्रयोजनमाह, 'यत्र पृथिवीत्वाभावादाविति, 'तत्तद्विपक्षेति घट-पटादिरूपेत्यर्थः, 'तत्र सद्धेताविति तत्र साध्ये यः सद्धेतुर्जलत्वादिस्तत्रेत्यर्थः, 'नाव्याप्तिरित्यनेनान्वयः, यावतामैकाधिकरण्यं सम्भवति तावदभावसमुदायाधिकरणविवक्षायास्तद्दोषासम्भवेन स्थलान्तरे अव्याप्तिमाह, 'पृथिवीत्वादाविति, द्रव्यत्वादेः समवायेन हेतुत्वे जातित्वाद्यवच्छिन्नाभावघटितकूटाधिकरणे समवायेन वृत्तेरप्रसिद्ध्या अतिव्याप्त्यनवकाशात् स्वरूपसम्ब-

न्येन हेतुत्वानुसरणम्। साधनसमानाधिकरणत्वस्य साध्याभावविशेषणतापत्ते जातित्वाद्यवच्छिन्नाभावस्य साधनासमानाधिकरणतया वारणसम्भवेऽपि प्रत्येकं साधनसमानाधिकरणजलावृत्तित्व-तेजोऽवृत्तित्वाद्यवच्छिन्नसमवायसम्बन्धावच्छिन्नाभावकूटाधिकरणतायाः सामान्यादावेव सत्त्वादतिव्याप्तिर्दुर्व्वारैवेति ध्येयम्। द्वितीयदलप्रवेशप्रयोजनमाह, 'नापीति, घटत्वाभावत्वादिना साध्यतायां घटादावेव साध्याभावकूटाधिकरणत्वप्रसिद्धिरत उक्तम् 'अभावत्वादिनेति, आदिपदान्मेयत्वादिपरिग्रहः, 'तत्तत्साध्येति घटत्वाभाव-पटत्वाभावादिरूपसाध्यस्य यः साध्यतावच्छेदकव्याप्यप्रतियोगिताको घटत्व-पटत्वादिरूपोऽभावस्तत्समुदायाधिकरणाप्रसिद्धेरित्यर्थः, यावतामैकाधिकरण्यं सम्भवतीति विवक्षायामपि तादृशाभावसमुदायवति घटादौ हेतोर्वृत्तेरव्याप्तिरेव। न च यावतामभावानामैकाधिकरण्यसम्भवस्तादृशाभावकूटाधिकरणं यद्यत् तावदन्यतमवृत्तित्वत्वसमनियतप्रतियोगिताकोऽभावो विवक्षणीयः घटवृत्तित्वत्वाद्यवच्छिन्नाभावश्चोपदर्शितस्थले न तथा जगत एव तावदन्यतमान्तर्गतत्वात्, अपि तु घटत्वादिना जगद्वृत्तित्वसामान्याभाव एव वृत्तिमद्वृत्तिस्तथाविधोऽभावः, तावदधिकरणान्यतमत्वञ्च तत्तदधिकरणावृत्तिशून्यत्वं न तु तत्तदधिकरणान्यान्यत्वमतो नाप्रसिद्धिरिति वाच्यम्। एवमपि जातिप्रतियोगिकाभाववान् मेयत्वादित्यादौ जातिमतामेव घटत्व-पटत्वघटिततादृशकूटाधिकरणतया जातिमद्वृत्तित्वत्वावच्छिन्नाभावस्यापि तादृशतया अव्याप्तेर्दुर्व्वारत्वादिति। अत्र साध्याभाववत्तायां सम्बन्धविशेषानिवेशे

कालपरिमाणवान् मेयत्वादित्यादावतिव्याप्तिः कालस्यापि कालिकसम्बन्धेन कालपरिमाणाभावाधिकरणतया जगत एव साध्याभावकूटवत्त्वात् दैशिकविशेषणतासम्बन्धनिवेशे च घटत्वाभाववान् पटत्वादित्यादावव्याप्तिर्घटत्वादेस्तेन सम्बन्धेनावृत्तेस्तेन सम्बन्धेन तद्घटितकूटाधिकरणाप्रसिद्धेः, तेन सम्बन्धेन वृत्तिमत्त्वस्याभावविशेषणत्वे तु घटत्वाभावादिसाध्यके व्यभिचारिणि व्यधिकरणधर्म्मावच्छिन्नाभावमादायातिव्याप्तिः कालिकसम्बन्धावच्छिन्नप्रतियोगिताके घटत्वाभावाभावे साध्ये आत्मत्वादिहेतावव्याप्तिश्च घटातिरिक्तवस्तुमात्रस्यैव दैशिकविशेषणतया साध्याभावकूटवत्त्वात् साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धनिवेशेऽप्ययमेव दोषः, किञ्चिद्विशिष्टतादृशसाध्यस्य योऽभावस्तस्य दैशिकविशेषणतासम्बन्धावच्छिन्नाभावस्तद्रूप इति दैशिकविशेषणताया अपि निरुक्तसाध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धत्वात्। स्वनिष्ठतादृश(१)प्रतियोगितावच्छेदकसम्बन्धेन स्वाधिकरणत्वनिवेशे च व्यधिकरणधर्म्मावच्छिन्नाभावस्य साध्याप्रतियोगिकतया तदसंग्रहप्रसङ्ग इति साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताज्ञानं प्रति यत्सम्बन्धावगाहि यदभावज्ञानं प्रतिबन्धकं तेन सम्बन्धेन तदभावाधिकरणत्वं विवक्षणीयं व्यधिकरणधर्म्मावच्छिन्नाभाववत्ताबुद्धिरपि व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिप्रकारकबुद्धिं प्रतिबध्नातीति तादृशाभावस्य लक्षणघटकतानिर्व्वाहः। यदि चाभाववत्ताज्ञानं प्रति दैशिकविशेषणतासंसर्गकमपि तदभावाभावत्वावच्छिन्न-

(१) साध्यनिरूपितेत्यर्थः।

प्रकारकज्ञानं प्रतिबन्धकम् अभावाभावस्यातिरिक्ततामते तादृश-ज्ञानप्रतिबन्धकताया आवश्यकत्वात्, तस्य प्रतियोगिस्वरूपत्वमतेऽपि फलसाम्यानुरोधेन तदावश्यकत्वात् अभावाभावस्यातिरिक्तत्व-ग्रहदशायां तत्प्रतिबन्धकताया दुरपह्नवत्वाच्च, एवञ्च कालिकसम्बन्धावच्छिन्नप्रतियोगिताके घटत्वाद्यभाव-जातित्वादेरभावे साध्ये आत्मत्व-जातित्वादावव्याप्तिर्दुर्व्वारैव दैशिकविशेषणतासम्बन्धस्यापि निरुक्तरूपाक्रान्तत्वात्। न चैवं तादृशसाध्यवत्यपि पक्षे तादृश-साध्याभावत्वावच्छिन्नप्रकारकप्रमारूपप्रतिबन्धकज्ञानसम्भवात्तद्वि--षयस्य हेत्वाभासतापत्तिरिति वाच्यम्। तत्र पक्षे साध्यं नास्तीति-ज्ञानस्य भ्रमत्वं निर्व्विवादमिति तदुपपादनाय तादृशसाध्यप्रति-योगिनस्तादृशसाध्याभावत्वेन दैशिकविशेषणतया वृत्त्यनभ्युपगमा-दित्युच्यते, तदा निरुक्तसम्बन्धेन तादृशसाध्याभावत्वावच्छिन्नाधि-करणताकूटवत्त्वं विवक्षणीयं हेतुमति च तादृशाधिकरणताविर-हान्नोक्ताव्याप्तिः।

परे तु घटत्वादेरपि दैशिकविशेषणतास्वीकार आवश्यकः अन्यथा घटे न घटत्वाभाव इत्यादिनञन्वयिप्रतीति-व्यवहारयो-रनुपपत्तिः काले न द्रव्यत्वमित्यादिप्रयोगविरहेण सप्तम्य-र्थदैशिकविशेषणतासंसर्गावच्छिन्नाधेयत्वान्वितस्वार्थबोधजनकत्व--स्यैव (१) नञ्पदे व्युत्पन्नत्वात्। न च भावरूपप्रतियोगिवा-चकपदसमभिव्याहृतनञा दैशिकविशेषणतासम्बन्धावच्छिन्नाधेय-तया अभावरूपप्रतियोगिवाचकपदसमभिव्याहृतनञा च प्रति-

(१) दैशिकविशेषणतासंसर्गावगाहिबोधजनकत्वस्यैवेति पा०।

योगितावच्छेदकसम्बन्धावच्छिन्नाधेयतया अभावः प्रत्याय्यते (१) इति व्युत्पत्तिरिति वाच्यम्। प्रतियोगितावच्छेदकसम्बन्धत्वेन सम्बन्धबोधोपगमे सर्व्वेषां मेयाभावानां दैशिकविशेषणतासम्बन्धावच्छिन्नप्रतियोगिताकः किञ्चिद्विशिष्टस्वाभावस्य योऽभावस्तद्रूपतया तादृशसम्बन्धश्च प्रतियोगितावच्छेदक इत्यतिप्रसङ्गात् (२) विशिष्य समवाय-कालिकादिभानस्यैवोगन्तव्यतया प्रतियोगिन्यभावे सम्बन्धविशेषावच्छिन्नप्रतियोगिताकत्वाबोधकादयमभावो नास्तीत्यादितः सम्बन्धविशेषावच्छिन्नाधेयताप्रतीतौ (३) नियमकाभावात् समभिव्याहारविशेषनिरपेक्षस्य तात्पर्य्यस्य नियामकत्वे कालिकादिसम्बन्धावच्छिन्नप्रतियोगिताकात्मत्वाद्यभावादेरात्मत्वरूपो योऽभावस्तस्य समवायादिसंसर्गतात्पर्य्येणात्मन्ययमभावो नास्तीति प्रयोगप्रसङ्गात्। वास्तवतत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावरूपप्रतियोगिवाचकपदसमभिव्याहारस्य तत्सम्बन्धावच्छिन्नाधेयताभाननियामकत्वे (४) वस्तुतः कालिकादिसम्बन्धावच्छिन्नप्रतियोगिताकेऽस्मिन्नभावे कालिकसम्बन्धावच्छिन्नप्रतियोगिताकत्वसंशयदशायाम् अयमभावो नास्तीति वाक्यादधिकरणे एतदभावाभाववत्त्वप्रतीतावपि अधिकरणे कालिक-

---

(१) दैशिकविशेषणताऽभावरूपप्रतियोगिवाचकपदसमतिव्याहृतनञा च प्रतियोगिभूताभावप्रतियोगितावच्छेदकसम्बन्धः प्रत्याय्यत इति पा०।

(२) आत्मनि कालिकसम्बन्धावच्छिन्नप्रतियोगिताको घटत्वाभावाभावो नेत्यादिप्रतीत्यापत्तिरूपोऽतिप्रसङ्गः।

(३) सम्बन्धविशेषप्रतीताविति पा०।

(४) तत्सम्बन्धभाननियामकत्व इति पा०।

सम्बन्धेनाभाववत्त्वादिसंशयस्य (१) सर्व्वानुभवसिद्धस्योच्छेदापत्तेः। अथैवं कालादावपि कालिकसम्बन्धावच्छिन्नघटत्वाभावो नास्तीति प्रतीत्यनुरोधेन घटत्वादेर्दैशिकविशेषणतास्वीकारस्यावश्यकतया तत्र समवायसम्बन्धावच्छिन्नघटत्वाभावो नास्तीति व्यवहारापत्तिरिति चेन्न, प्रतियोगिमति तदभावत्वेन वृत्तेरनभ्युपगमात् इत्यञ्च दैशिकविशेषणतासम्बन्धेन साध्याभावत्वावच्छिन्नवत्त्वं लक्षणे निवेशनीयं कालिकसम्बन्धावच्छिन्नप्रतियोगिताकघटत्वाभावाभाववान् आत्मत्वादित्यादौ घटत्वाभावस्य तादृशसाध्याभावत्वेनात्मन्यवृत्तेर्नाव्याप्तिः। एतेन यादृशसाध्यकस्थले साध्याधिकरणे साध्याभावस्य तदधिकरणे च साध्यस्य न भ्रमः प्रसिद्धः तत्र प्रतिबध्य-प्रतिबन्धकभावकल्पनासम्भवेन प्रतिबन्धकताघटितलक्षणस्याव्याप्तिरिति निरस्तमिति वदन्ति।

तत्त्वचिन्तामणि-दीधितिः।

तन्न द्रव्यत्व-पृथिवीत्वोभयवान् द्रव्यत्वादित्यादौ तदुभयान्यतरत्वावच्छिन्नाभाववति द्रव्यत्वादेरवृत्तेरतिव्याप्तेः। अपि चेदंपृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वादित्यादौ द्रव्यत्वत्वावच्छिन्नाभावकूटाधिकरणगुणाद्यवृत्तित्वस्य द्रव्यत्वे सत्त्वादतिव्याप्तेः द्रव्यत्वत्वाद्यवच्छिन्नप्रतियोगितायाः पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्त-

---

(१) अयमभावो नास्तीति वाक्यादधिकरणवृत्तित्वस्य एतदभावाभावे प्रतीतावपि अधिकरणनिरूपितकालिकसम्बन्धावच्छिन्नाधेयत्वाभाववत्त्वादिसंशयस्येति पा०।

त्वात्। किञ्च रूपाभावसाध्यके सद्धेतौ साध्याभावसमुदायनिविष्टसकलरूपव्यक्त्यधिकरणाप्रसिद्धेः। यावतामभावानामैकाधिकरण्यं तावतां समुदाये विवक्षितेऽपीदंपृथिवीवृत्तिगुणशून्यं सत्तान्यपृथिवीसमवेतशून्यं वा वायुत्वाद्रूपवदन्यत्वाद्वेत्यादावतिव्याप्तिः तत्र तादृशसाध्याभावस्तोमस्य नियमतो रूपादिघटितत्वेन तद्वति तद्धेतोरवृत्तेः, वस्तुतो निखिलानामेव रूपाणां तादृशाभावसहस्रसमानाधिकरणत्वात्समानाधिकरणयावदभावाधिकरणाप्रसिद्धिर्दुर्व्वारैव।

गादाधरी विवृतिः।

'तदुभयेति, द्रव्यत्व-पृथिवीत्वान्यतरत्वावच्छिन्नप्रतियोगितायाअपि तदुभयत्वसमनियततया तादृशाभाववतो गुणादेरेव निरुक्तसाध्याभावकूटाधिकरणत्वादिति भावः। प्रतियोगिवैयधिकरण्याघटितव्यापकत्वस्य साध्यतावच्छेदकविशेषणत्वमुपगम्य उभयत्ववति प्रत्येकमुभयत्वाभावसत्त्वेन तस्य प्रतियोगिताव्यापकत्ववारणे तु तद्रूपावच्छिन्नसाध्यकसद्धेतावव्याप्तिर्द्रष्टव्या, व्यासज्यवृत्तित्वाव्यासज्यवृत्तित्वान्यतररूपेण साध्यतावच्छेदकसजातीयो यो धर्म्मस्तदवच्छिन्नत्वस्य प्रतियोगिताविशेषणत्वोपगमे(१) नैतादृशातिव्याप्त्यवकाश इत्यतः स्थानान्तरेऽतिव्याप्तिमाह, 'अपि चेति, 'द्रव्य-

(१) तथाचान्यतरत्वावच्छिन्नप्रतियोगित्वस्य साध्यतावच्छेदकसजातीयधर्म्मावच्छिन्नत्वाभावादेव तादृशप्रतियोगितावारणात्।

त्वत्वाद्यवच्छिन्नेति शुद्धद्रव्यत्वत्वाद्यवच्छिन्नेत्यर्थः, 'पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वादिति, विशेषणावच्छिन्नस्य शुद्धविशेष्यानतिरिक्तत्वादिति भावः। विशिष्टस्यातिरिक्तत्वे विशिष्टद्रव्यत्वादिसाध्यकस्थले शुद्धद्रव्यत्वाद्यभावस्य वारणसम्भवात् दूषणान्तरमाह, 'किञ्चेति, 'रूपाभावेति रूपत्वाद्यवच्छिन्नाभावेत्यर्थः, 'सन्वेतावित्यव्याप्तिसूचनाय, 'सकलरूपव्यक्त्यधिकरणाप्रसिद्धेरिति, तथाच तद्घटितसाध्याभावकूटाधिकरणाप्रसिद्ध्या अव्याप्तिरिति भावः। 'यावतामिति, तथाच प्रकृते सकलरूपघटितसमुदायस्य न लक्षणघटकता सकलरूपाणामैकाधिकरण्यविरहात् किन्तु एकैकरूपव्यधिकरणधर्म्मावच्छिन्नाभावघटितकूटानामेव प्रत्येकं तदधिकरणता च रूपवत्स्वेव प्रसिद्धेति नाव्याप्त्यवकाश इति भावः। 'इदमिति, वायौ पृथिवीवृत्तिद्वित्व-संयोगादिसत्त्वाद्वायुत्वादेरुक्तसाध्यव्यभिचारिता, गुणसामान्याभावस्य साध्यत्वे वायवीयस्पर्शादिरपि साध्याभावः तद्घटितनिरुक्ताभावकूटवद्वृत्तित्वाभावस्य यावदन्तर्गतस्य वायुत्वादावभावान्नातिव्याप्तिसम्भवः इति 'पृथिवीवृत्तीति, घट-तद्वायुद्वित्व-पट-तद्वायुद्वित्वादिरूपपृथिवीवृत्तिगुणाभावाभावानां यावतां वायावैकाधिकरण्यसम्भवेन तद्घटितकूटस्यापि लक्षणघटकतया तद्वति वायौ हेतोर्वृत्त्या नातिव्याप्तिसम्भवः। न च द्वित्वादिरूपसाध्याभावस्य उत्पत्तिकालेऽसत्त्वेन कालिकाव्याप्यवृत्तितया व्याप्यवृत्तित्वविशेषणेन तद्व्यावृत्तिः पार्थिवपरमाण्वेकत्वादिरेव लक्षणघटक इत्यतिव्याप्तिर्दुर्व्वारैवेति वाच्यम्। प्राचीनमते द्वित्वादिमति तत्प्रागभावादिकालावच्छेदेन

तदत्यन्ताभावासत्त्वात् द्वित्वादेरपि व्याप्यवृत्तित्वादिति पृथिवी-पदम्, इदम्पद-पृथिवीपदयोः कर्म्मधारयो वाभिमतः। न च स्वस-मानाधिकरणाभावाप्रतियोगित्वम् अनवच्छिन्नवृत्तिकत्वं वा व्याप्य-वृत्तित्वं न तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं, तच्च न द्वित्वादिसाधारणमिति पृथिवीपदस्य पृथिवीसामान्यपरत्वेऽपि न च्चतिरिति वाच्यम्। एतदतिव्याप्तिवारणानुरोधेनात्यन्ताभाव-घटितव्याप्यवृत्तित्वस्यैव निवेशयितुमुचितत्वात् एतद्रूपात्यन्ताभाव-वान् मेयत्वादित्यादावेतद्रूपात्मकाभावस्य लक्षणाघटकत्वेऽति-व्याप्त्यापत्तेः प्राचीनमतेऽत्यन्ताभावघटितव्याप्यवृत्तित्वनिवेशस्याव-श्यकत्वाच्च। अतएव चाग्रेतनं 'रूपादिघटितत्वेनेत्यपि साधु सङ्गच्छते, पार्थिवरूपमात्रस्यैवानित्यतया अत्यन्ताभावघटितव्याप्यवृत्तित्वा-निवेशे तस्य व्याप्यवृत्तित्वाभावेन तदसङ्गत्यापत्तेः, वृत्तिस्तु सम-वायेन बोध्या, तेन वायवीयस्पर्शादेः कालिकसम्बन्धेन पृथिवीवृत्ति-त्वेऽपि न क्षतिः पृथिवीसमवेतत्वावच्छिन्नाभावो गुरुधर्म्मस्य प्रति-योगितानवच्छेदकत्वेऽप्रसिद्धः पृथिवीसमवेतत्वावच्छिन्नत्वेनाभिम-तायां प्रतियोगितायां केवलसमवेतत्वस्यैवावच्छेदकत्वसम्भवेन पृथिवीसमवेतत्वस्याभावप्रतियोगितानवच्छेदकत्वात्। न च पृथिवी-समवेतत्वावच्छिन्नाया जलत्वादिव्यावृत्तप्रतियोगिताया अतिप्रसक्त-समवेतत्वस्य नावच्छेदकत्वसम्भव इति वाच्यम्। समवेतत्वावच्छि-न्नप्रतियोगितातः अतिरिक्ताया जलत्वादिव्यावृत्तप्रतियोगिताया-एवासिद्धेर्गुरुधर्म्मस्याभावप्रतियोगितावच्छेदकत्वेऽपि पृथिवीसम-वेतत्वावच्छिन्नाभावसाध्यके नातिव्याप्तिसम्भवः तादृशाभावस्य सम-

*Markandeya Purana, Fasc. 5-7 @ /10/ each	Rs. 1	14
*Mīmāṁsā Darçana, Fasc. 10-19 @ /10/ each	6	4
*Nyāyavārtika, Fasc. 1--6 @ /10/ each	3	12
*Nirukta, Vol. IV. fasc. 1-8 @ /10/ each	5	0
*Nitisara, Fasc. 3-5 @ /10/ each	1	14
Nityācārapaddhatiḥ, Fasc. 1--7 @ /10/ each	4	6
Nityācārapradīpaḥ Vol. I. Fasc. 1--8 ; Vol. II, Fasc. 1-3. @ /10/ each ...	6	14
Nyayabinduṭīkā, Fasc. 1 @ /10/ each	0	10
*Nyāya Kusumāñjali Prakaraṇa Vol. I, Fasc. 2--6 ; Vol. II, Fasc. 1--3 @ /10/ each	5	0
Nyayasarah	2	0
Padumawati, Fasc. 1--5 @ 2/	10	0
*Pariçiṣṭa Parvan, Fasc. 3--5 @ /10/ each	1	14
Prākrita-Paingalam, Fasc. 1--7 @ /10/ each	4	6
Prithivirāj Rāsa. Part II, Fasc. 1--5 @ /10/ each	3	2
Ditto (English) Part II, Fasc. 1 @ 1/-	1	0
Prākṛta Lakṣaṇam Fasc. 1 @ 1/8/ each	1	8
Parāçara Smṛti, Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1--6 ; Vol III, Fasc. 1--6 @ /10/ each	12	8
Parāçara, Institutes of (English) @ 1/- each	1	0
Pariksamukha Sutram	1	0
Prabandhacintāmaṇi (English) Fasc. 1--3 @ 1/4/ each	3	12
Rasarnavam, Fasc. 1-3	3	12
Saddarsana-Samuccaya, Fasc. 1-2 @ /10/ each	1	4
Samaraieca Kaha Fasc. 1-3, @ /10/	1	14
Sāṇkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/ each	2	8
Ditto (English) Fasc. 1-3 @ 1/- each	3	0
*Sankara Vijaya, Fasc. 2-3 @ /10/ each	1	4
Six Buddhist Nyaya Tracts.	0	10
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each	3	12
Sragdharā Stotra (Sanskrit and Tibetan)	2	0
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each	1	0
Suddhikaumudī, Fasc 1-4 @ /10/ each	2	8
Sundaranandam Kavyam	1	0
Suryya Siddhanta fasc. 1	1	4
Syainika Sastra	1	0
*Taittreya Brahmana, Fasc. 11-25 @ /10/ each	9	6
,, Pratisakhya, Fasc. 1-3 @ /10/ each	1	4
*Taitterīya Saṁhitā, Fasc. 27--45 @ /10/ each	11	14
Tāṇḍya Brāhmaṇa, Fasc. 10--19 @ /10/ each	6	14
Tantra Vārteka (English) Fasc. 1-8 @ 1/4/ each	10	0
*Tattva Cintāmaṇi, Vol. I, Fasc. 1-9, Vol II, Fasc. 1-10, Vol. III, Fasc. 1-2, Vol. IV. Fasc. 1, Vol. V, Fasc. 1-5, Part IV. Vol. II, Fasc. 1-12 @ /10/ each	24	6
Tattva Cintamani Didhiti Vivriti, Fasc, 1, @ /10/ each	0	0
Ditto Prakas, fasc. 1-2, @ /10/ each	1	4
Tattvārthadhigama Sutram, Fasc. 1-3 @ /10/ each	1	14
Tirthacintamoni, fasc, 1, @ /10/ each	0	10
Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/ each	1	14
Tul'si Satsai, Fasc. 1--5 @ /10/ each	3	2
*Upamita-bhava-prapañca-kathā, Fasc. 1-2, 5-13 @ /10/ each	6	14
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ 1/- each	6	0
Vallāla Carita, Fasc 1 @ /10/	0	10
Varṣa Kriyā Kaumudī, Fasc 1--6 @ /10/ each	3	12
*Vāyu Purāṇa, Vol. I, Fasc. 3--6 ; Vol. II, Fasc. 1--7, @ /10/ each ...	6	14
Vidhāna Pārijata, Fasc. 1-8 Vol- II. Fasc. I @ /10/ each	5	10
Ditto Vol. II, Fasc. 2-4 @ 1/4/	3	12
Vivādaratnākara, Fasc. 1--7 @ /10/ each	4	6
Vṛhat Svayambhū Purāṇa, Fasc. 1--6 @ /10/ each	3	12
*Yoga Aphorisms of Patanjali, Fasc. 3-5 @ /10/ each	1	14
Yogasāstra of Hemchandra Vol. I. Fasc. 1-3	3	12

Tibetan Series.

Baudhyastotrasangraha, Vol. I (Tib. & Sans.)	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1--4 @ 1/- each	4	0
Nyayabindu of Dharmakirtī, Fasc. 1	1	0
Pag-Sam S'hi Ṭiñ, Fasc. 1--4 @ 1/- each	4	0
Rtogs brjod dpag ḣkhri S'iñ (Tib. & Sans. Avadāña Kalpala Vol. I, Fasc. 1--8 ; Vol. II. Fasc. 1--7 @ 1/- each	15	0
Sher-Phyin, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc 1-6, @ 1/ each	14	0

Arabic and Persian Series.

'Ālamgirnāmah, with Index, (Text) Fasc. 1--13 @ /10/ each	8	2
Al-Muqaddasi (English) Vol. I, Fasc. 1--4 @ 1/- each	4	0
Akbarnāmah, with Index, Fasc. 1--37 @ 1/8/ each...	55	8

*The other Fasciculi of these works are out of stock and complete copies canno be supplied.

Āīn-i-Akbarī, Fasc. 1-22 @ 1/8/ each	33	0
Ditto (English) Vol. I, Fasc. 1--7. Vol. II, Fasc. 1--5, Vol III, ...	36	0
Ditto (English) Vol. I, Fasc. 1--8 ; Vol. II. Fasc. 1-7 Vol 3 @ 1/4/ each	20	0
Arabic Bibliography, by Dr. A. Sprenger, @ /10/	0	10
*Bādshāhnāmah, with Index. Fasc. 1--19 @ /10/ each	11	14
Conquest of Syria, Fasc. 1-9 @ /10/ each ... ... Rs.	5	10
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each	2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1--3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each	31	8
Farhang-i-Rashīdī, Fasc. 1--14 @ 1/8/ each	21	0
Fihrist-i-Ṭūsī. or, Ṭūsy's list of Shy'ah Books, Fasc. 1--4 @ 1/- each ...	4	0
Futūḥ-ush-Shām of Wāqidī. Fasc. 1--9 @ /10/ each	5	10
Ditto of Āzādī, Fasc. 1--4 @ /10/ each	2	8
History of Gujarat	1	0
Haft Asmān, History of the Persian Masnawi. Fasc. 1 @ /12/ each ...	0	12
Hisātory of the Caliphs, (English) Fasc. 1--6 @ 1/4/ each	7	8
Iqālnamah-i-Jahāngīrī, Fasc. 1--3 @ /10/ each	1	14
Iṣābah, with Supplement, 51 Fasc. @ 1/- each	51	0
Ma'āṣir-i-Ālamgīrī, Fasc. 1--6 @ /10/ each	3	12
Maa'āṣir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 @ 1/ each	35	0
Maghāzi of Wāqidī, Fasc. 1--5 @ /10/ each	3	2
Marhamu 'L Ilali 'L-Mu'Dila	1	0
Muntakhabu-t-Tawārīkh, Fasc. 1--15 @ /10/ each	9	6
Ditto (English) Vol. I, Fasc. 1--7 ; Vol. II, Fasc. 1--5 and 3 Indexes ; Vol. III. Fasc. 1 @ 1/ each	16	0
Muntakhabu-l-Lubāb, Fasc. 1-19 @ /10/ each	11	14
Ditto Part 3, Fasc. 1	1	0
Nukhbatu-l-Fikr. Fasc. 1 @ /10/	0	10
Niẓāmī's Khiradnāmah-i-Iskandarī. Fasc. 1--2 @ /12/ each	1	8
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut. Col. D. C. Phillott	5	0
Riyāzu-s-Salāṭīn, Fasc. 1--5 @ /10/ each	3	2
Ditto (English) Fasc. 1--5 @ 1/	5	0
Tadhkira-i-khushnavīsān	1	0
Tabaqnāt-i-Nāṣirī, (English), Fasc. 1-14 @ 1/- each	14	0
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ziyān-d-dīn Barni Fasc. 1--7 @ /10/ each ..	4	6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāi Aif. Fasc. 1--6 @ /10/ each ...	3	12
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each	3	0
Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1 @ 1/	1	0
Wis-o-Rāmīn, Fasc. 1--5 @ /10/ each	3	2
Zafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc 1--8 @ /10/ each	10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vols. XIX and XX @ 10/ each 20
2. Proceedings of the Asiatic Society from 1870 to 1904 @ /8/ per No.
3. Journal of the Assiatic Society for 1870 (8), 1871 (7). 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8). 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7). 1901 (7). 1902 (9), 1903 (8). 1904 (16), @ 1/8 per No. to Members and @ 2 per No. to Non-Members

N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.

4. Journal and Proceedings, N. S., 1905, to date. (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members
6. Centenary Review of the Researches of the Society from 1784-1883 ... 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910, ... 8 0
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I--III. with 8 coloured Plates, 4to. @ 6/ each 18 0
9. Kaçmīraçaodāmṛta, Parts I & II @ 1/8/ 3 0
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ... 10 0

Notices of Sanskrit Manuscripts. Fasc. 1-34 @ 1/ each 34 0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

N.B.—All Cheques, Money Orders, &c. must be made payable to the "Treasurer Asiatic Society," only.

Books are supplied by V. P. P. 23-12-11.

B Gangesa
132 Tattvacintamani-didhiti-
N8G3 vivrti
1910
v.1
pt.5

[redacted]

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY